॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

# ॥ राजभोगारात्रिकार्या ॥

## गोस्वामिश्रीविठ्ठलेशप्रभुचरणविरचिता

### गो.श्या.म.विरचितवर्तिकादीप्तिसमेता

### ( मंगलाचरणम् )

श्रीव्रजराजश्यामसुन्दरौ मदहंममतिसत्यकरौ ॥
भक्तेरिह यौ भावविभावौ हृदि गेहेऽप्यनुभूतिचरौ ॥१॥
भजनविधावितरेऽपि मदीये परिवारे भजनीयवराः ॥
राजन्ते वल्लभकृपयैव परमाः मत्पुरुषार्थपराः ॥२॥
श्रीमदाचार्यचरणं वन्दे प्रभुचरणावपि ॥
मध्याह्नारात्रिकार्याहं व्याख्यास्ये तत्कृपाबलात् ॥३॥

### ( उपोद्घातः )

सच्चिदानन्दरूपे हि ब्रह्मण्यानन्दगूहनाद् ॥
सृष्टिलीला-निगूढान्वेषणे हि पुरुषार्थता ॥४॥
सदंशभूतविषयेभ्यो तद्ग्राहिकरणैः सदा ॥
दुःखाभावसुखावाप्तौ चिदंशानां मतिः स्थिरा ॥५॥
गूढानन्दस्योपलब्धौ दुःखेऽप्यानन्दरूपता ॥
प्रेम्णा निरोधे त्वानन्दे नैवानिष्टमतिः क्वचित् ॥६॥
बाह्यानन्दो विभावात्मा स्थायी भावस्तथान्तरः ॥
ब्रह्मणो रूपरसते बाह्याभ्यन्तरभेदतः ॥७॥
रूपस्य भजनं बाह्यमान्तरं रसनात्मकम् ॥
बाह्यान्तरानन्दलब्धौ या भक्तिः सा परा मता ॥८॥
रसेतराणां स्यात्तर्हि भक्तिसञ्चारिभावता ॥



निरोधोऽयं भक्तिशुद्ध्यै त्रैगुण्यातिक्रमाय च ॥९॥
ततः सर्वात्मभावे हि भक्तेः फलति पूर्णता ॥
सेव्यरूपे निरोधाय नीराजनमपीष्यते ॥१०॥
तत्स्वरूपावलोके हि तद्भिन्नासंगकालजः ॥
वियोगो वार्यते तत्र चैकैकांगावलोकने ॥११॥
नीराजनेन सर्वांगमनोहार्यवलोकनं ॥
एवंभावनया तेन निरोधः सुलभो भवेत् ॥१२॥
राजभोगारात्रिकातः कार्या भक्तेन स्वप्रभोः ॥
इत्थंभावोद्बोधनायैवार्या गेया तदन्तिके ॥१३॥
भगवद्भक्तिभक्तानां निरोधैकप्रयोजना ॥
लहर्युल्लोलिता कृष्णविलासोदधिविठ्ठले ॥१४॥

### ( विचार्यो विषयः )

इदम् अत्र विचार्यते : [क]एतदार्यागानं भगवत्सेवायाम् अकरणे प्रत्यवाजनकतया, काम्यकर्मतया, उत; कर्मसमृद्ध्यर्थं वा विहितं? [ख]कश्च तदधिकारी? [ग]किम्प्रयोजनकं च एतद्गानम्? [घ]कथं च तद् विधेयम् इति?

### ( [क]तत्र एतस्य विहितत्वे अनुपपत्तिपरिहारौ )

ननु भगवदाहितभक्तिबीजभावस्वारसिका हि पुष्टिभक्तिः, विहितातु पुनः मर्यादाभक्तिरेवेति किं केन कथमिह संगच्छते! इति चेद् ब्रूमः :

> **''तएते साधवः साध्वि! सर्वसंगविवर्जिताः संगः तेषु अथ सम्प्रार्थ्यः सर्वसंगहराहि ते. सतां प्रसंगाद् मम वीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथाः, तज्जोषणाद् आशु अपवर्गवर्त्मनि श्रद्धा रतिः भक्तिः अनुक्रमिष्यति''.**
>
> ( भाग.पुरा.३।२५।२४-२५ ).

इति कपिलावतारे यथा योगमार्गांगत्वेन भक्तियोगम् उपदिशता भगवता

भक्तौ न विधेः किमुत सर्वसंगविवर्जितसाधुसंगस्यैव प्राथमिकी खलु उपादेयता विद्योतिता, तदनु तेभ्यो हृत्कर्णरसायनरूपभगवत्कथाश्रवणं तच्छ्रवणेन च श्रद्धारतिभक्त्यनुक्रमोऽपि यथा प्रतिपादितः; तथैव श्रीकृष्णावतारेऽपि.

तथाहि —

**"न रोधयति मां योगो न सांख्यं धर्मएव च न स्वाध्यायस् तपस् त्यागो न इष्टापूर्तं न दक्षिणा व्रतानि यज्ञस् छन्दांसि तीर्थानि नियमाः यमाः, यथा अवरुन्धे [१]सत्संगः सर्वसंगापहोहि माम्"(औत्सर्गिको नियमः).**

**"सत्संगेन हि दैतेयाः... वैश्याः शूद्राः स्त्रियो अन्त्यजाः, रजस्तमप्रकृतयः तस्मिंस्तस्मिन् युगे अनघ! बहवो मत्पदं प्राप्ताः... व्याधः कुब्जा, व्रजे गोप्यः... ते नाधीतश्रुतिगणाः नोपासीतमहत्तमा अव्रतातप्ततपसः [२]सत्संगाद् माम् उपागताः. केवलेन हि भावेन गोप्यो गावः खगाः मृगा; ये अन्ये मूढधियो नागाः सिद्धाः माम् ईयुर् अञ्जसा, यं न योगेने सांख्येन दानव्रततपोध्वरैः व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद् यत्नवानपि... ताः नाविदन् मयि अनुषंगबद्धधियः स्वम् आत्मानम् अदः तथा इदम्, यथा समाधौ मुनयो अब्धितोये नद्यः प्रविष्टाइव नामरूपे. मत्कामाः रमणं जारम् अस्वरूपविदो अबला ब्रह्म मां परमं प्रापुः [३]संगात् शतसहस्रशः.(नियमोपनयः).**

**"तस्मात्, त्वम् उद्धव! उत्सृज्य चोदनां प्रतिचोदनां, प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च, मामेकमेव शरणम् आत्मानं सर्वदेहिनां याहि सर्वात्मभावेन मया स्या हि अकुतोऽभयम्"(उक्तस्य निगमनम्).**

(भाग.पुरा.११।१२।१-१५).

इत्येवमाद्युपदेशैश्च स्वलीलाभिः चापि प्रथमं तावत् पूर्वोपदिष्टायाः



योगमार्गांगभूतायाः भक्तेरिव इहापि विहितनिषिद्धप्रवृत्तिनिवृत्तिरूपयोः धर्मयोः, सांख्ययोगादीनामपि च, त्यागपुरःसरं सर्वसंगापहस्य भगवतः संगप्राप्तये सत्संगनियमस्य उपदेशः कृतः. तत्र त्रिष्वपि एतेषु वचनेषु क्रमशः 'सत्संगात्' 'सत्संगात्' 'संगात् शतसहस्रशः' इत्येवं पदप्रयोगोपलम्भेन सर्वेऽपि एते एकार्थवाचिनो भिन्नार्थवाचिनो वा इति भवति विचिकित्सा?

तत्र किं 'सतां'=साधुजनानां संगो वा सत्संगः? आहोस्वित् 'सतो'=भगवतो वा संगः सत्संगः? अथवा 'समानकोटिकानां समेषां सहस्रावधिभक्तानां मिथः'=संगो वा सत्संगः इति त्रिष्वपि एतेषु वचनेषु एकहेलया कश्चन एकार्थकतया वा; विभिन्नार्थकतया वा 'सत्संग'पदार्थो अभिप्रेतो वा इति प्रथमं तावद् विचारणीयम्. अपिच एतेषु वचनेषु अर्थपार्थक्यम् उपेक्ष्य सत्संगमेव प्राथमिकोपायत्वेन उपदिदिषति भगवान् नवा? इत्यपि विचारणीयमेव.

अपार्थक्यहेतुस् तावद् इत्थं सम्भाव्यते : **"त्वयि, अम्बुजाक्ष!, अखिलसत्त्वधाम्नि समाधिना आवेशितचेतसा एके, त्वत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धिं, स्वयं समुत्तीर्य सुदुस्तरं, द्युमन्!, भवार्णवं भीमम् अदभ्रसौहृदाः भवत्पादाम्बुजनावम् अत्र ते निधाय याता सदनुग्रहो भवान्"** (भाग.पुरा.१०।२।३०-३१) इति न्यायेन ये भगवदेकनिष्ठाः ते अनुसरणीयाः. तथाहि :

[१]भगवत्संगोपलब्धये यः कश्चन उपायः तादृशैः अनुष्ठितः तदनुकरणेन भगवत्संगः कर्तव्यो; अथवा, भगवदनुग्रहेण भगवदितरासंगनिरासकत्वेन च भक्तसंगोपलब्ध्यापि कथञ्चिद् भगवत्येव खलु अनन्यभावः संवर्धनीयः? साचैषा खलु सर्वेष्वपि युगेषु साधारणी एकैव व्यवस्था अविप्रतिपन्नैव भाति, '**तस्मिंस्तस्मिन् युगे**' इति लिंगेन संद्योतिता.

[२]तत्र भगवान् सर्वसंगापहारको भवति चेत् तदा यैः साकं भगवत्प्राप्तये

सत्संगः चिकीर्षितः तेषां सञ्जातभगवत्संगत्वे सति ते असंजातभगवत्संगस्य इतरस्य संगमेव न कुर्युः. अन्यथा भगवतः सर्वसंगापहारकतामेव ते साधवो नूनम् अपहरेयुः! तद् उक्तं **"अतो मूलभ्रमप्रतिपन्नं देहात्मभावं व्यामोहकशास्त्रप्रतिपन्नं च भावं परित्यज्य हृदये विद्यमानो भगवान् भावनीयः... अन्यथा विजातीयैः सह भक्ताः भजनं न कुर्वन्ति"** (सुबो.१०।प्रक्षि.३।२८-३०) इति. इदम् अत्र आकूतम् : अवतारकाले अवतीर्णभगवत्स्वरूपस्यैव सत्संगो विधेयः:. तद् उक्तं **"अतः आविर्भावः स्वेच्छया भक्त्या ज्ञानेन वा. भगवदवतारातिरिक्तकाले द्वयमेव हेतुः. अवतारदशायान्तु न तयोः प्रयोजकत्वम्"** (सुबो.१०।२६।१३) इति. भगवत्संगस्यैव अवतारकाले साधनफलोभयरूपतया हि अभीष्टतमता वरीवर्त्यते. नूनं भगवतः प्रमेयबलादेवेति, न तदा भगवन्निष्ठानां ज्ञानभक्तियोगांगतया प्राथमिकोपायतया वा इतरथा वापि विहितस्य साधुजनसंगस्यापि काचन अपेक्षा अवकल्पते. तद् उक्तं **"विधिः अत्र प्रमेये न नियामकइति, न भगवतो विहितं वा निषिद्धं किञ्चिद् अस्ति... प्रमेयबले वेदापेक्षया भगवदाज्ञा कर्तव्या"** (सुबो.१०।६४।७-२२) इति.

[३] तृतीयेतु अनवतीर्णस्यापि भगवतो यदा प्रमेयबलेनैव उद्धिधीर्षा तदा वास्तविकभगवत्स्वरूपस्य बोधाबोधयोरपि अकिञ्चित्करतैवेति मूढानामपि स्वमौढ्योद्गते सत्यपि यस्मिन् कस्मिंश्चिदपि लौकिकभावे प्रमेयबलादेव उद्धरणम्. परमिह नूनं केवलो भावः स्वपरानुसंधानरहितो अपेक्ष्यते. तेनैव मुनीनामिव भावसमाधिरपि एतादृशानां सम्भवेदिति. सेयं खलु अलौकिके वस्तुनि प्रमेयबलजाता लौकिकभावानुरूपा सदनुग्रहात्मिका विभावता भक्तभावरूपधारणक्षमता वा भगवतो, ययापि उद्धारो न न शक्यः.

निगमनसदृशवचने तु भूमौ अवतीर्णेन भगवता स्वस्य श्रुत्यादि-शास्त्रोक्तविधिनिषेध-नैरपेक्ष्येण सर्वभावेन अनन्यशरणागमनं तावत् स्वोपलब्धि-साधनतया उद्धवाय उपदिष्टम्. अनवतारकाले, परन्तु, भगवतः संगस्य अतीवदुर्लभत्वेन महतां सतां योगसांख्यदानव्रततपोध्वरपराणां श्रुत्यादिशास्त्रव्या-



ख्यास्वाध्यायसंन्यासनिष्ठानां साधुजनानां संगाभावे भगवत्संगो नूनं मरुमरीचिका-यते! यस्मात् स्वाभाविकी तु जीवानां वैषयिक्येव सुखोपलब्धि-दुःखनिरसन-पर्यवसिता प्रवृत्तिः अनुभूतिचरा. नहि एतादृशानां **"रूपं गन्धो मनो बुद्धिः आत्मा कालः तथा गुणाः, एतेषां परमार्थश्च सर्वम् एतत्, त्वम् अच्युत!, विद्याविद्ये भवान्, सत्यम् असत्यं त्वं, विषामृते, प्रवृत्तिं च निवृत्तं च कर्म वेदोदितं, भवान्!, समस्तकर्मभोक्ता च, कर्मोपकरणानि च... सर्वाणि, सर्वकर्मफलं च यः"** (विष्णुपुरा.१।१९।६९-७१) इत्यत्र उक्ता सर्वविधप्रमाणप्रमेयसाधनफलोपादानरूपस्य भगवतो अनन्यसंगनिर्वाहानु-कूला मतिः सुलभा. तमेतं प्रापञ्चिकसकलविषयोपादानभूतं सर्वान्तरसंनिविष्टं परमात्मानं संसारी जीवात्मा स्वाहंकार-ममकारोपेतां प्राकृतमतिं परित्यज्य विषयीकर्तुं समर्थो न भवति. कोहि भगवान्? कथं तस्य संगः? सोऽपि पुनः अनवतारकाले कथम् अवाप्यो भवेद् इति भगवत्पराणां साधुजनानां संगं विना अवधारयितुं को वा कथं वा शक्नुयाद्! ततोहि अनवतारकाले तावत् महत्तमानां सतां साधूनामेव खलु भगवत्संगोपलब्धिप्रेरकः संगः सत्संगः. ततः तदनु मिथो भक्तसंगस्य ततः स्वानुष्ठित-विधिनिषेधमूलकप्रवृत्तिनिवृत्तिरूपधर्माणां भगवत्प्रापकताभिमानत्यागेन भगवति अनन्यशरणागत्या तस्मिन् अनन्यभावो भावनीयः, इति श्रीमद्भागवतारम्भएव **"तत्र अन्वहं कृष्णकथाः प्रगायताम् अनुग्रहेण अशृणवं मनोरमाः. ताः श्रद्धया मे अनुपदं विशृण्वतः प्रियश्रवसि अंग! मम अभवद् रुचिः"** (भाग.पुरा.१।५।२६) इति यद् उक्तं, तदनुवृत्तयएव महाप्रभुणापि स्वसम्प्रदाये—

**"परम् अत्र न सर्वेषां फलमुखाधिकारः किन्तु येषु भगवत्कृपा, कृपापरिज्ञानं च मार्गरुच्या निश्चीयते. तत्र आदितः साधनानि आह 'कृष्णसेवापरम्' इति. योहि गुरुः सेवाम् उपदेक्ष्यति स स्वयं चेत् ताम् उत्तमां जानीयात् तदा कथं न स्वयं न कुर्यादिति सेवापरएव गुरुः. तत्रापि निमित्तानि वारयति 'दम्भादिरहितम्' इति. सेवाच प्रमाणमूलैव**

**पुरुषार्थपर्यवसायिनी अन्यथा मनसि अन्यद् विधाय अन्यथाकरणे न फलसिद्धिरिति 'भागवततत्त्वज्ञम्' इति. जिज्ञासुः नतु कौतुकाद्याविष्टः. 'भजनं' सर्वभावेन तदा तदुक्तप्रकारेण ( स्वगृहे स्वभगवद्भावम् अनाविष्कुर्वन् स्वतनुवित्त-परिजनसमर्पणरूपा ) भगवत्सेवा कर्तव्या. सच दुर्लभइति तेनापि वक्तव्यं प्रकारम् आह 'तदभावे' इति. तदभावे स्वयं वापि मूर्तिं कृत्वा हरेः क्वचित् परिचर्यां सदा कुर्यात्. तद्रूपं तत्र च स्थितम्''.**

(त.दी.नि.२।२२५-२२८)

इति अनवतारकालेऽपि मौढ्याहंकारौ परित्यज्य गुरुरूपस्य महत्पुरुषस्य अन्वेषणानन्वेषण-विकल्पानुकल्पयोः भगवत्संगस्यैव सर्वविधा उपादेयतमता प्रशंसिता. एतेन मध्यमाधिकारक-पुष्टिभजनविधौ भगवत्संगसाधक-बाधकानां विहित-निषिद्धाचरणानां प्रमाणमूला व्यवस्था भृशम् अभ्युपेतैवेति भाति. न ततः केवलप्रमेयबलावलम्बनमेव केवलम्. अतएव ''**भगवानेव सर्वं करोति इति उक्तेऽपि भजनाभावे न सिद्ध्यतीति भजनम् अवश्यं कर्तव्यम्**'', ''**मध्यमाधिकारिणां वेदपरत्वं न दोषाय इति निरूपितम्. अन्यथा प्रमाणपराणाम् अनन्यभावो भज्येत**'' (सुबो.३।३२।२२, १०।३४।२०) इति उपदिशता महाप्रभुणा भगवद्भजनौपयिक-विधिनिषेधयोः आवश्यकता बीजभावाहितायां स्वारसिकभक्तावपि सन्दर्शितैव. तद् उक्तं ''**सेवार्थं सत्संगः इति प्रथमं साधनं... निर्दुष्टा सेवा द्वितीयं साधनं... सेवाच पुष्टिमार्गे सस्नेहा. कृपाफलञ्च एतत्**''(सुबो.१।५।२३-२८) इति.

**(भक्त्युपदेशार्थम् आवश्यकतार्थक'तव्या'दिप्रत्ययप्रयोगविषयकौ पूर्वोत्तरपक्षौ)**

ननु महाप्रभुणैव [१]स्वरूपम् [२]अभिप्रायज्ञानं [३]भावना [४]अभिधा [५]आज्ञा [६]इष्टसाधनताज्ञानम् इति षडपि विध्यर्थपक्षान् एकहेलया दूषयितुं ''**प्रवर्तकत्वं कृष्णस्य न विध्यर्थस्य कर्हिचिद्**'' (त.दी.नि.२।१७७) इति यत् प्रतिपादितं तस्य का गतिः? यत्र कर्ममर्यादावेदकेषु वेदेष्वपि विधेः प्रवर्तकता न



अंगीकृता तत्र भगवद्भजने शास्त्राचार्यभक्तानां विधेः प्रवर्तकत्वं महत् चित्रम्! अतएव या खलु चतुःश्लोकी-सिद्धान्तमुक्तावल्योरपि 'भजनीयः'-'कार्या' इति सेवाभजनोपदेशे विध्यर्थकताम् अपहाय आवश्यकतार्थकतैव व्याख्याकारैः अभ्युपेता तस्याअपि का गतिः? किञ्च विधिनिषेधयोस्तु ''**कर्मणा कर्मनिर्हारो नहि आत्यन्तिकः इष्यते. अविद्वदधिकारित्वात्... केचित् केवलया भक्त्या... अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः**'' (भाग.पुरा.६।१।११-१५) इति अविद्वदधिकारिता त्रैगुण्याधिकारकता चापि भागवते निरूपिता. भगवन्निष्ठज्ञानभक्त्योस्तु पुनः ''**ज्ञानयोगः च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः**'', ''**हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः स सर्वदृगुपद्रष्टा तं भजन् निर्गुणो भवेद्**''(भाग.पुरा.३।३२।३२ १०।८८।५) इति नैर्गुण्यावाप्त्य-धिकारकतापि. तथा गीतायाञ्च ''**त्रैगुण्यविषयाः वेदाः निस्त्रैगुण्यो भव**'' (भग.गीता.२।४९) इत्यपि ततएव अशेषाघवारकतापि सन्दर्शिता. अपिच तैत्तिरीयोपनिषद्यपि ''**आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति एतं ह वाव न तपति 'किम् अहं साधु नाकरवं किम् अहं पापम् अकरवम्!' इति**'' (तैत्ति.उप.२।९) इति गुणातीते ब्रह्मणि भक्त्या आनन्दानुभूतिपराणां कृताकृतभीतिराहित्यमपि सुनिरूपितमेव. प्रथमस्कन्धेऽपि तावद् भगवदुपाश्रितया मायया त्रैगुण्यसम्मोहौ तज्जन्यानर्थावपि, तत्रच साक्षाद् भक्तियोगस्य ''**अनर्थोपशामकत्वम्**'' (भाग.पुरा.१।६।५-६) चापि स्वीकृतम्. तथैव एकादशेऽपि ''**स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशो विकर्म यच्च उत्पतितं कथञ्चिद् धुनोति सर्वं हृदि संनिविष्टः**'' (भाग.पुरा.११।५।४२) इत्येवमादिवचनेषु जागरुकेषु कथन्नु गुणातीते भक्तिमार्गे त्रैगुण्याधिकारकौ विधिनिषेधौ स्वपादप्रसारचाञ्चल्यं प्रकटीकर्तुम् अर्हतः?

अथ एतद् अवकल्प्येत त्रैगुण्याधिकारकवेदोक्तविधिनिषेधयोः न पादप्रसारः परन्तु महतां भगवत्पराणां भक्तिमार्गीयविधिनिषेधयोरपि वारणेतु गुणातीतभक्तिमार्गोपदेशानामेव आनर्थक्यापत्तिः दुष्परिहरा भवित्री इति. तदपि न चारु, तदुपदेशावहेलनया, प्रत्यवायितापत्तौ सत्यां कर्मयोगवदेव समानौ आक्षेपपरिहारौ वज्रलेपायितौ स्याताम्! अयि भोः किं तदा भक्तियोगस्य

साक्षादनर्थोपशामकता किमु प्ररोचनार्थको अर्थवादएव? न इति ब्रूमो, यतोहि यथोपदिष्टाननुसरणे भक्तेः बीजभावः फलपाकाय न अलं स्याद्. नच इष्टापत्त्या प्रत्यवस्थातव्यं, यस्मात् सर्वेऽपि जीवात्मानः प्राकृतविषयजन्ययोः सुखदुःखावाप्तिपरिहारयोः तावद् आनन्दमेव उपलब्धुं प्रसज्यन्ते, तत्र महताम् उपदेशाननुसरणे आनन्दानुपलब्ध्या अन्ततो भृशं दूयेयुः. ननु भवतु मादृशस्य कस्यचन न तत्र त्वरा इति चेद् न, नहि विषयसुखावाप्ति-दुःखपरिहारयोः स्वीयैव जीवाभिलाषा आभीक्ष्ण्येन सर्वदा हेतुः. तद् उक्तं "**भगवानेव यथेष्टं यथैव प्रवर्तयते तथा ज्ञानम् उत्पाद्य प्रवर्तते. वस्तुतस्तु न किञ्चिद् इष्टं न किञ्चित् साध्यम् इति अर्थः**" (त.दी.नि.२।१७८) इतीयं महती किल उपपत्तिः भगवद्वरणैकलभ्या भक्तिर्नाम 'पुष्टिभक्तिः' इति! उताहो जीवान्तर्यामिणएव बीजभावारोपणप्ररोहणयोः भक्तिफलदानविलम्बयोः सर्वनियामकता न जीवपुरुषार्थस्य!

**(ज्ञानभक्तिमार्गोपदेशेषु 'लोट्'-'लिङ'दिप्रत्ययानां विध्यर्थकतानंगीकारः तदसंस्पर्शिता वेति पूर्वोत्तरपक्षौ)**

इदम् इह आशंक्यते किं ज्ञानभक्तिमार्गयोः 'लोट्-लिङ'दिप्रत्ययानां विध्यर्थकता अपाक्रियते उत एतन्मार्गयोः तदसंस्पर्शितैव?

तत्र नाद्यः, सेवाभजनस्मरणविवेकधैर्याश्रयाणां आवश्यकार्थक-'तव्या'-'ऽनीयर्'-'ण्यत्'प्रत्ययप्रयोगैः उपदेशेऽपि "**निवेदिभिः समर्प्यैव सर्वं कुर्याद्**", "**अव्यावृत्तो भजेत् कृष्णं**", "**कृष्णस्य सर्ववस्तूनि भूम्न ईशस्य योजयेद्**", "**अनुकूले विष्णोः कार्याणि कारयेत्... प्रतिकूले गृहं त्यजेद्**", "**कृष्णसेवापरं वीक्ष्य भजेद्**", "**एतद्विरोधि यत् किञ्चित् तत्तु शीघ्रं परित्यजेद्**", "**मानापेक्षां विवर्जयेत्**" (१६ग्र.५।५, ९।२, १५।१२, ५श्लो.३ त.नि.२सा.प्र.१८, तत्रैव ३३) इत्येमादिवचनेषु 'लिङ'दिविध्यर्थकप्रत्ययान्तानां क्रियापदानां प्रयोगसद्भावात्. सर्वथापि प्रवर्तना खलु तावद् विध्यर्थः. सा श्रुत्यादिशास्त्राणां वा भवतु सम्प्रदायाचार्याणां वा न वैलक्षण्यं हि लेशतः. प्रवर्तकत्वन्तु तावत् प्रमाणान्तरेण अप्राप्तेहि अर्थएव अकामैरपि



अभ्युपगन्तव्यमेव. अन्यथा "**विरहानुभवैकार्थसर्वत्यागोपदेशको भक्त्याचारोपदेष्टा च कर्ममार्गप्रवर्तको यागादौ भक्तिमार्गैकसाधनत्वोपदेशकः**" (सर्वो.स्तो.१८-१९) इति निजाचार्यनाम्नामपि आचार्यमाहात्म्यप्रतिपादकत्वं कुतो न ध्वंसेत! ततश्च तस्यैतस्य अतिदेशो गुणातीतब्रह्मणि सुप्रतिष्ठितैः महानुभावैः ज्ञानिभिः भगवदीयैः वापि लोककल्याणार्थं यत्किमपि कर्म समाजिज्ञपयिषितं, लोकहितैककामनया अभ्यनुजिज्ञपयिषितं वा, उत सन्दर्शितमपि वा निजवृत्तं, तैः निखिलैरपि साधारणजीवानां भवतु सफलप्रवृत्तिजनकम् आवश्यकतायाअपि सम्प्रज्ञानम्. कथमपि प्रवर्तकतान्तु न जातु अतिक्रामति चेत्, ततश्च कोहि अत्र असाधारणो निर्बन्धो विधिपक्षक्षेपेण आवश्यकतापक्षरक्षणे दाक्ष्याविष्करणे!

न द्वितीयो महाप्रभुणापि

"**यो विधीयते सो अर्थः; क्रियाच विधीयते, पुरुषप्रयत्नेन... निष्पाद्यतइति सा क्रिया कर्मवाचकेभ्यएव प्रतीयते, अतः कर्मशब्दाएव साक्षाद् धर्मवाचकाः... इदमेव, अनुगतं रूपं क्रियासामान्यं, 'धर्म'पदप्रवृत्तिनिमित्तं क्रियासामान्यं प्रतिपादयन्तो विशेष(यज्ञदानादि)प्रतिपादकाः इति उक्तं भवति... अतीन्द्रियो यागादिः स्थिरो धर्मः तत्र 'सामान्यं नित्यम्' इति नित्यता प्रतिपादिता, विशेषस्तु अतीन्द्रियता. द्रव्यदेवतासम्बन्धो हि यागो, देवतायाः अतीन्द्रियत्वात् तत्सम्बन्धोऽपि अतीन्द्रियः. सम्बन्धश्च प्रीतिहेतुत्वेन स्वीकारो; द्रव्यं च अलौकिकमिति अनित्यतायां न कोऽपि हेतुः. नहि चेष्टा यागो येन विनाशः कल्प्यते अदृष्टं वा! ये क्षणिकत्वम् अदृष्टं वा कल्पयन्ति न ते यागपदार्थं विदुः... अवघातादयः ऐन्द्रियकाः आशुतरविनाशिनः... मन्त्रेण च अवघातो देवपत्न्यः च कर्त्र्यः, लौकिके तदावाहनाद् अतीन्द्रियत्वमेव. फले सम्पन्ने तस्य तिरोभावः. सएव हि अर्थो लौकिकस्तु संसारहेतुत्वाद् अनर्थः. अतएव विधीयते**

**पुरुषः प्रवर्त्यते. अन्यथा प्रयत्नाभावाद् अकथनं स्याद्'', ''चोदना प्रवर्तकं वाक्यं तद् धर्मलक्षणत्वेन उक्तं तस्याः धर्मत्वपरिज्ञापकत्वम्''.**

(भावा.पा.भा.२।१।१, तत्रैव २।१।५)

इति निजकण्ठोक्त्यैव अभ्युपेता 'लोट्'-'लिङा'दिप्रत्ययान्तानां क्रियावाचकपदानां विध्यर्थकतया प्रवर्तकत्वम्. तस्माद् यदि **''भजनीयो व्रजाधिपः स्वस्य अयमेव धर्मो हि''**(चतुश्लो.१) इत्यत्र व्रजाधिपभजनस्य पुष्टिमार्गे धर्मरूपता तदा भजनस्य आवश्यकत्वेऽपि धर्मत्वेन विधिशेषता अंगीकरणीयैव. अतः प्राकृतैः गुणैः जन्याः ये ज्ञानेच्छाप्रयत्नाः तज्जाता च या आशुतरविनाशिनी लौकिकी क्रिया सा धर्मस्य सामान्यं रूपं, विशेषरूपन्तु तस्य अलौकिकार्थप्रतिपादकैः शास्त्रीयैः विध्यर्थवाचकैः पदैः जनिताः ये ज्ञानेच्छाप्रयत्नाः तज्जाताभिः विशेषरूपाभिः क्रियाभिः पुष्टिभक्त्यादिरूपाभिरपि यावत्फलप्रापणानश्वरो धर्मः लौकिकद्रव्यगुणक्रियासु आहितो भवति. तत्र अलौकिक-द्रव्य-देवता-तत्सम्बन्धकर्तृ-णाम् आधानानि धातुपाषणादिनिर्मितमूर्तौ देवतावद् भवति. त्रिगुणात्मकेष्वपि वस्तुषु एवं हि निस्त्रैगुण्यं समाविर्भवति, अन्यथा आशुतरविनाशिता अप्रतीकार्यैवेति अनिच्छतापि उररीकार्यम्. नच **''त्रैगुण्यविषया वेदाः''** (यथोक्ते) वचनासंगतिः इति वाच्यं, काकतालीयन्यायेन वचनैकदर्शनेन निखिलशास्त्रपारंगतंमन्यस्य अयम् अपराधो न पुनः भगवदुक्तेः! तथाहि **''वेदाः ब्रह्मात्मविषयाः त्रिकाण्डविषयाः इमे... मां विधत्ते अभिधत्ते मां विकल्प्य अपोह्यते तु अहम् एतावान् सर्ववेदार्थो शब्द आस्थाय मां भिदा, मायामात्रम् अनूद्य अन्ते प्रतिषिध्य प्रसीदति''** (भाग.पुरा.११।२१।३५-४३) इति सुस्पष्टा त्रैगुण्यविषयतावद् वेदानां गुणातीतब्रह्मविषयतापि पारमार्थिक्येव. अतएव निस्त्रैगुण्यायैव भगवदुपदेशो न पुनः वेदपरिहापनायेति.

ननु तदा भगवानपि **''न वेदयज्ञाध्ययनैः न दानैः... नच क्रियाभिः न तपोभिः उग्रैः एवंरूपः शक्यः...'', ''भगवानपि विश्वात्मा**



**लोकवेदपथानुगः...कामान् सिषेव... असक्तः सांख्यम् आस्थितः''** (भग.गीता.११।४८, भाग.पुरा.३।३।१९) इति निजवचनैश्च तथाच आचरितैरपि महाराजमार्गं कर्मब्रह्मविधायकाभिधायकैः वेदवचनैः समुदितं यद् आत्मानन्दरूपं द्रव्यकर्मकामसेवनं तत् परित्यज्य कुतोनु सांख्यप्रक्रियाम् अंगीचकार? इति चेत्

समाधत्स्व! **''प्रकृतिर्हि अस्य उपादानम् आधारः पुरुषः परः सतो अभिव्यञ्जकः कालो ब्रह्म तत्त्रितयन्तु अहम्''** (भाग.पुरा.११।२४।१९) इति ब्रह्मवादात्मिकैव सांख्यप्रक्रिया इयं नेतरा. तद् नूनं **''ऐतदात्म्यम् इदं सर्वं, तत् सत्यं, स आत्मा, तत् त्वम् असि''**(छान्दो.उप.६।१२।७) इति उपनिषदुक्ता प्रकृतिपुरुषयोः ब्रह्मात्म्यैक्यावलोकनरूपैव नतु अब्रह्मात्मकयोः प्रकृतिपुरुषयोः विवेकदर्शनरूपा इति. ब्रह्मणः सच्चिदंशाभ्यां प्रादुर्भूतानां रूप-कर्म-नाम्नां यथा ब्रह्मात्मत्वं तथा प्रकृति-पुरुषोपादानकतापि. तद् उपपादितं बृहदारण्यके **''त्रयं वा इदं नाम रूपं कर्म... तदेतत् त्रयं सद् एकम् अयम् आत्मा आत्मा उ एकः सन् एतत् त्रयम्''** (बृह.उप.१।६।१-३) इत्यत्र. ततश्च यस्य ज्ञानिनः त्रिष्वपि ब्राह्म्यैक्यधर्मपुरस्कारेण त्रित्वानुदर्शनं तस्य निर्गुणानुभूतिः. यस्यतु ब्रह्मानवबोधहेतुकेन केवलत्रित्वधर्मपुरस्कारेण दर्शनं तस्य तेषामेव नाम-रूप-कर्मणां प्राकृतगुणजन्या सगुणानुभूतिः इति विवेकः. तद्वद् प्राकृतैः कर्तव्यज्ञान-फलेच्छा-देहाद्यभिमानमूलकप्रयत्नैः अनुष्ठीयमानं यथाशास्त्रविधि कर्मापि तत् त्रैगुण्याधिकारकतया तज्जन्यमोहवर्धकमेव अन्तवत् चापि. तस्माद् **''ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतं ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना''** (भग.गीता.४।२४) इति न्यायेन ब्राह्म्यैक्यानुभूतौ नहि केवलो ब्रह्मज्ञानी ब्रह्म भवति किमुत **''सर्वं खलु इदं ब्रह्म''** (छान्दो.उप.३।१४।१) इति वाक्यानुरोधात् परोक्षज्ञान-श्रद्धा-विश्वास-साक्षात्कारसाधारणी तत्तदधिकारानुसारिण्येव इयं ब्राह्मी कथा!

तस्माद् एतदार्यागानाशक्तत्वेऽपि न भक्तानां प्रत्यवायिता; नापि

निष्कामभक्त्यनुभावरूपायां सेवायां कस्याश्चिदपि लौकिककामनापूर्त्यर्थं नीराजनकाले इयम् आर्या गेया इत्यपि मन्तुं युक्तम्.

**( [ख] कश्च तदधिकारी ? इति जिज्ञासासमाधाने )**

तस्माद् [ख] एतदार्यागाने को हि वैधो अधिकारी इति जिज्ञासासमाधाने एवम् अवधेये : अधिकारिणां तावद् अनेके प्रभेदा: महाप्रभूणां ग्रन्थेषु मुख्यकल्प-विकल्पा-ऽनुकल्पै: उपलभ्यन्तएव :

**१.''सात्त्विका: भगवद्भक्ता: ये मुक्तौ अधिकारिणो भवान्तसम्भवा दैवा: तेषाम् अर्थे निरूप्यते... स्वभावप्रकृत्यपेक्षया अधिकं विहितम् अलौकिकं ये कुर्वन्ति ते सात्त्विका: तत्रापि भगवत्सेवका: सेवापरा: तत्रापि ये निष्कामा:... तत्रापि ईश्वरेच्छया अन्तिमजन्मनि जाता:''.**

**२.'' 'इदं भागवतं नाम पुराणं वेदसम्मितं... नि:श्रेयसाय लोकानां... सर्ववेदेतिहासानां सारं-सारं समुद्धृतं' (भा.पु.) त्रैवर्णिकानाम् उद्धारार्थे वेद:, स्त्रीशूद्राणाम् इतिहास:, उभयसारोद्धारत्वात् ( भागवतपुराणं ) सर्वोद्धारकम्''.**

**३.''धर्ममार्गं परित्यज्य छलेन अधर्मवर्तिनो पतन्ति नरके घोरे पाषण्डमतवर्तनाद्, अधुनातु कलौ सर्वे विरुद्धाचारतत्परा: स्वाध्यायादिक्रियाहीना: तथाचारपराङ्मुखा: क्रियमाणं तथा आचारं विधिहीनं प्रकुर्वते... तत्र धर्म: कथं भवेद्... अथापि धर्ममार्गेण स्थित्वा कृष्णं भजेत् सदा श्रीभागवतमार्गेण स कथञ्चित् तरिष्यति... अत्रापि वेदनिन्दायाम् अधर्मकरणात् तथा नरके न भवेत् पात: किन्तु हीनेषु जायते... मार्गो अयं सर्वमार्गाणाम् उत्तम: परिकीर्तित: यस्मिन् पातभयं नास्ति मोचक: सर्वथा यत:. सर्वानेव येन-केनचिद् उक्तप्रकारेणापि प्रवर्तमानान् मोचयति, मोचकस्वभावत्वात्. तत्र स्ववाक्यानुगतान् कथं न मोचयेत् ?''.**



**४.''वैदिककर्मयोगनिर्धारम् उक्त्वा सुगमसर्वजनीनतान्त्रिककर्मनिर्धारम् आह... लौकिकानर्थस्य लौकिकै( श्रौतेतरै )रेव निवृत्ति: युक्ताइति सांख्यादय: प्रवृत्ता:. तत्रापि शीघ्रहृदयग्रन्थिविभेदको वैष्णव:, केवलपुष्टिमार्गेण... तत्र अशक्तौ तन्त्रोक्तप्रकारेणापि... अथवा समुच्चयो मर्यादया, उभयथापि वा''.**

( त.दी.नि.प्र.१।२ , सुबो.१।३।४०-४२ , त.दी.नि.प्र.२-।२२२, सुबो.११।३।४८ ).

तस्माद् निजाचार्याणाम् पुष्टिप्रपत्तिभजनाद्युपदेशेषु विध्यर्थकप्रत्ययप्रयोगो वा आववश्यकतार्थकप्रत्ययप्रयोगो वा भवतु उभयथा अंगीकारेऽपि उपदेशभाजां कृते प्रवर्तना तु तेषु अंगीकार्यैव, तदुल्लंघने दण्ड्यता वा कृतसाधनानुष्ठानवैफल्यं वा अनिच्छतापि उरीकार्यमेव.

ननु प्रवर्तनावचनत्वांगीकारे प्रमाणान्तरै: अप्राप्तएव कर्तव्ये प्रवर्तनावचनानां प्रयोजनवत्त्वम् अभ्युपगमनीयम्. तथात्वेतु विधिवचनानां येहि भेदोपभेदा: भवन्ति :

क.शाब्दिको विधि:. ख.आर्थिको विधि: चेति प्राथमिको भेद:.

क.शाब्दिके [क/१] पदबोधितो विधि: [ख/२] आर्थिके वाक्यबोधितो विधि:.

क.शाब्दिके [क/१/१] उद्देश्यपदेन [क/१/२] विधेयपदेन.

ख/१द्रव्यस्य ख/२जाते: ख/३गुणस्य ख/४क्रियाया: च इति.

ख.आर्थिके उद्देश्यविधेयभावबोधकोभयपदबोधित: चतुर्विधोऽपि विधि: पुन: अपूर्व-नियम-परिसंख्या-वाक्यै: द्वादशविधो भवति.

तथाहि

[ख/१/१]द्रव्यापूर्वं, [ख/१/२]द्रव्यनियमः [ख/१/३]द्रव्यपरिसंख्यानम् [ख/१/४]जात्यपूर्वं [ख/१/५]जातिनियमः [ख/१/६]जातिपरिसंख्यानम् [ख/१/७]गु-णापूर्वं [ख/१/८]गुणनियमः [ख/१/९]गुणपरिसंख्यानम् [ख/१/१०]क्रियापूर्वं [ख/१/११]क्रियानियमः [ख/१/१२]क्रियापरिसंख्यानम् इति.

एतेषां द्वादशानामपि [१]सामान्यवाक्येन [२]विशेषवाक्येन [३]प्रतिप्रसवेन [४]अभ्यनुज्ञया [५]व्यवस्थाबोधकेन [६]अभावबोधकेन [७]साधारणबोधकेन [८]उत्कर्षबोधकेन [९]अपकर्षबोधकेन वा इति १०८ विधानामपि एतेषां पुनः उत्पत्ति-प्रयोग-विनियोग-अधिकाररूपावान्तरैः प्रभेदैः आहत्य ४३२ स्थूलप्रकाराः भवन्ति.

तएते भेदोपभेदाः आवश्यकतापक्षवादिनां न अभिमताः चेद् गतं तदा आवश्यकप्रत्ययान्तानां प्रर्वतकतांगीकारेण. अभिमतत्वेतु विधितो भेदएव कथन्नु उपपद्येत ?

तत्र सावधानैः इदम् इह समवधेयं : नूनम् अस्ति तावत् सर्वथा प्रवर्तकत्वं किन्तु न वचनमात्रेण, श्रोतरि वाच्यवस्तूत्कर्षवर्णनप्रयुक्तो तद्विषयकः स्वस्य आवश्यकतासम्प्रत्ययो जायते येन स्वहृदयेनैव नियोजितो भवति, न पुनः वचनमात्रेण. कदाचिद् तदुपेक्षया अनौत्कण्ठ्येन वा तदर्थम् अप्रवृत्तो तदनुपलब्ध्या नहि तावद् वक्तुः नापि वचनस्य अपराधिनम् आत्मानं मन्येत; किमुत, निजात्मानमेव अकृतकृत्यं हतभागिनं मत्वा दूयेतापि! तद् उक्तं **''अवश्यम्भावः आवश्यकम्... अवश्यम्भावविशिष्टे... कर्तरि च वाच्ये 'कृत्याश्च' 'कृत्य'संज्ञकाश्च प्रत्ययाः आवश्यकाधमर्ण्योः उपाधिभूतयोः धातोः भवन्ति : भवता खलु अवश्यं कटः कर्तव्यः करणीयः कार्यः कृत्यः''** ( पाणि.अष्टा.काशि.३।३।१७०-१७१ ) इति. तदेतद् उपोद्बलितं महाप्रभुणापि :

**''इष्टसाधनताज्ञानस्य प्रवर्तकत्वं तदा स्याद् यदि**



**अनिष्टसाधनतां ज्ञात्वा निवर्तेत. विषभक्षणे, युद्धे, द्रुमात् पतने, प्रवृत्तिदर्शनात्... अतो भगवानेव यथेष्टं यथैव प्रवर्तयते तथा ज्ञानम् उत्पाद्य प्रवर्तयते. वस्तुतस्तु न किञ्चिद् इष्टं; न किञ्चित् साध्यम् इति अर्थ. ननु एवं सति अर्थवादादीनां वैयर्थ्यम् इति आशंक्य आह 'मिथ्याप्रलोभनम्' इति. वेदे कर्मादिषु अविद्यमानं फलरूपं न कोऽपि अंगीकरोति येन सार्थकता स्यात् किन्तु यथास्थितमेव आह. अतः सर्वस्यापि स्वरूपप्रतिपादकत्वाद् न एकवाक्यतासिद्ध्यर्थमपि प्रवर्तकत्वम् अंगीकर्तव्यम्... वेदे सर्वस्यापि स्वरूपप्रतिपादकत्वाद् न प्रवर्तकत्वं किन्तु सर्वस्यापि साधनं फलं च आह. तावतैव प्रवर्तकत्वं यदि तदा 'ओम्' इति ब्रूमः. फलमुखप्रवृत्तिः (चेत्) सर्वानेव प्रवर्तयेत् ततश्च नरकादिकं न भवेद्. अतो दृष्टादृष्टारिष्टदर्शनाद् न वेदः प्रवर्तकः''.**

( त.दी.नि.प्र.२।१७८-१८० )

तस्मादेतस्मात् कारणात् सर्वत्र यथायथभगवल्लीलेच्छाप्रेरितमनोबुद्ध्यहंकारस्य जीवात्मनः क्वचित् प्रवृत्तिः, क्वचिद् अप्रवृत्तिः, क्वचिद् प्रवृत्त्यप्रवृत्तिवैमौढ्यं वा. नच इयं व्यवस्था विधेः ये षडर्थाः तैस्तैः वादिभिः अंगीकृताः तद्विषयिण्येव इति भ्रमितव्यं प्रत्युत यस्य-कस्यापि अधिकारिणो निजकृते कस्यचन कर्मणः आवश्यकताबोधेऽपि एवमेव श्रुत्यादिशास्त्रप्रामाण्यशरणैः स्वीकरणीया. तथाहि श्रुतयः :

**( सच्चिदानन्दब्रह्मणः प्रमाणरूपता )**

**१.''तमेव भान्तम् अनुभाति सर्वं तस्य भासा सर्वम् इदं विभाति'', ''यदेतद् हृदयं मनश्च, एतत् संज्ञानम् आज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिः धृतिः मतिः मनीषा जूतिः स्मृतिः संकल्पः क्रतुः असुः कामो वशः इति सर्वाण्येव एतानि प्रज्ञानस्य नामधेयानि''. ''सर्वस्य च अहं हृदि**

संनिविष्टो मत्तः स्मृतिः ज्ञानम् अपोहनं च''.

(कठोप.५।१५, ऐत.उप.४।५।२, भग.गीता.१५।१५).

२.''यद् वाचा अनभ्युदितं येन वाग् अभ्युद्यते... यद् मनसा न मनुते येन आहुः मनो मतं... यत् चक्षुषा न पश्यति येन चक्षूंषि पश्यति... तदेव ब्रह्म त्वं विद्धि'', ''एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति, तम् आत्मस्थं ये अनुपश्यन्ति धीराः तेषां सुखं शाश्वतं नेतरेषाम्''.

(केनोप.१।१।४-६, २।२।१२).

३.''एषो अस्य परमानन्दः एतस्यैव आनन्दस्य अन्यानि भूतानि मात्राम् उपजीवन्ति''.

(बृह.उप.४।३।३२).

(सच्चिदानन्दब्रह्मणः प्रमेयरूपता)

१.''भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्मम् एतत्'', ''यथा ऊर्णनाभिः सृजते गृह्यते च, यथा पृथिव्याम् ओषधयः सम्भवन्ति, यथा पुरुषात् केशलोमानि; तथा, अक्षरात् सम्भवति इह विश्वम्... तस्माद् एतद् ब्रह्म नाम रूपम् अन्नं च जायते''.

(श्वेता.उप.१।१२, मुण्ड.उप.१।१।७-९).

२.''तद् यथा क्षुरः क्षुरधाने अवहितः... एवमेव एष प्रज्ञः आत्मा इदं शरीरम् अनुप्रविष्टः... तमेतम् आत्मानम् एते आत्मानो अन्वस्यन्ति''.

(कौषि.उप.४।२०).

३.''आनन्दो ब्रह्म इति व्यजानाद् आनन्दाद्ध्येव खलु इमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्ति अभिसंविशन्ति''.

(तैत्ति.उप.३।६).

(सच्चिदानन्दब्रह्मणः साधनरूपता)



१.''एषह्येव साधु कर्म कारयति तं यम् एभ्यो लोकेभ्यः उन्निनीषते. एष उ एव एनम् असाधु कर्म कारयति तं यम् अधो निनीषते. एष लोकपालः एष लोकाधिपतिः एष सर्वेशः 'स म आत्मा'इति विद्यात्''.

(कौषि.उप.२।८).

२.''नायम् आत्मा प्रवचनेन लभ्यो न मेधया बहुना श्रुतेन यमेव एष वृणुते तेन लभ्यः तस्य एष आत्मा विवृणुते तनुं स्वाम्''.

(कठोप.१।२।२३).

३''को ह्येव अन्यात् कः प्राण्यात् यदेष आकाशे आनन्दो न स्यात्. एष ह्येव आनन्दयाति''.

(तैत्ति.उप.२।७).

(सच्चिदानन्दब्रह्मणः फलरूपता)

१.''यथापि हिरण्यनिधिं निहितम् अक्षेत्रज्ञाः उपर्युपरि सञ्चरन्तो न विन्देयुः एवमेव इमाः प्रजाः अहरहर्गच्छन्त्यः एतं ब्रह्मलोकं न विन्दन्ति अनृतेन प्रत्यूढाः. सवा एष आत्मा हृदि... तस्माद् यत् 'सत्' तद् अमृतं अथ यत् 'ति' तद् मर्त्यम् अथ यद् 'यं' तेन उभे यद् अनेन उभे यच्छति''.

(छान्दो.उप.८।३।२-५).

२.''सुषुप्तस्थाने एकीभूतः प्रज्ञानघनएव आनन्दमयो आनन्दभुक् चेतोमुखः''.

(माण्डु.उप.५).

३.तस्माद् वा एतस्माद् विज्ञानमयाद् अन्यो अन्तर आत्मा आनन्दमयः. तेन एष पूर्णः...तस्य प्रियमेव शिरो मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनन्दः आत्मा... आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन...''.

(तैत्ति.उप.२।५-८).

इदम् अत्र अवधेयं : क्वचित् प्रमाणांशकरणकं प्रमेयरूपयोः इष्टतत्साधनयोः आवश्यकतत्साधनयोः वा ज्ञानं, क्वचित् प्रमेयांशकरणकं प्रमाणरूपयोः इष्टसाधनतावश्यकतयोः ज्ञानं, क्वचित् साधनांशकरणकं फलरूपयोः अभीष्टतावश्यकतयोः ज्ञानं, क्वचित् फलांशकरणकं साधनरूपयोः इष्टसाधनतावश्यकसाधनतयोः ज्ञानं, यथायथं च अवतारानवतारकालभेदैः सम्भवति. अवतारकाले तु चतुर्णामपि प्रमाणादीनाम् इतरेतरतादात्म्यरूपम् एकत्वमपि साक्षाद् अनुभूतिगोचरताम् आपन्नं सद् योग्याधिकारिणं प्रति समवभासतएव. यथा आहुः "**भगवत्(लीलाप्रतिपादक)शास्त्रे भगवानेव प्रमाणादिचतुष्टयं, भगवत्साक्षात्कारो साक्षात्कृतो वा भगवान् प्रमाणम्... दर्शनं प्रमाणम्—आविर्भावः(/आविर्भूतः) प्रमेयम्**" (सुबो.१०।२।३८) इति. अथ अनवतारकालेतु तथासाक्षात्काराभावेऽपि चतुर्णामपि प्रमाणादीनां परोक्षा खलु वाचनिकी एकरूपता "**प्रमाणादीनां चतुर्णामपि एकरूपत्वात् सर्वमार्गापेक्षया अयम् उत्तमो मार्गः. तथाहि प्रमाणं भगवद्वाक्यम्. वाक्येन प्रवृत्तो साधनम् असाधयन्नपि भगवता कृतार्थीक्रियते. प्रमेयज्ञानं च फलानुभवरूपम्. साधनञ्च फलादपि अधिकं फलं च ज्ञानकर्मादिसाध्येभ्योऽपि अधिकमिति. अतएव अस्मिन् मार्गे पातभयं नास्ति, प्रमाणप्रवृत्तिम् आरभ्य भगवतो रक्षकत्वात्**" (त.दी.नि.प्र.२।२२२) इति महाप्रभुणैव भगवल्लीलाभग-वद्भक्तिमार्गयोः प्रमाणादीनां स्वरूपं सम्यक्तया निरूपितम्. एतेन निजमार्गे प्रमाणादिषु अन्यतमैकावलम्बनवादिनो हि एतन्मार्गप्राकट्यलीलायां विदूषकतयैव भगवता प्रकटीकृता इति निश्चितो राद्धान्तः.

सति चैवं प्रमेयरूपस्य ब्रह्मणएव रूपान्तरं कर्म यथाच "**विधिषेधप्रकारेण यः क्रियाशक्तिः उद्गतः तत् कर्म प्रकटं तावद् यावत् फलसमापनं... रूपान्तरन्तु तस्यैव इति अनुवर्तते. यथा कालो रूपम् अक्षरस्य तथा कर्मापि. परम् एतावान् विशेषः कालः स्वतएव प्रकटो अयन्तु पुरुषैः विधिनिषेधप्रकारेण प्रकटीक्रियते. अतो लोकानां हिताहितप्रदाने विशिष्यते. अयञ्च क्रियारूपो धर्मिणो धर्मे प्रवेशात्. कालवद् न स नित्यप्रकटः किन्तु फलदानपर्यन्तमेव**" (त.दी.नि.प्र.२।११०) इति प्रतिपादितं महाप्रभुणैव.



अतो ब्रह्मवादे यत् प्रमाणं तदेव प्रमेयसाधनफलात्मकं, यत् प्रमेयं तदेव प्रमाणसाधनफलात्मना आत्मानं प्रकटयति. तथैव येन साधनेन तत् प्राप्यते तदेव तज्ज्ञप्तौ प्रमाणमपि भवति, यच्च फलत्वेन अभिलषितं तदेव स्वोपलब्धौ साधनतामपि आवहते. तद् उक्तं "**प्रमेयं हरिरेव एकः सगुणो निर्गुणः च सः. गुणाः कार्यं तथा धर्मः क्रियोत्पत्त्यादयः च सः... यथा शब्दएव प्रमाणं, तत्रापि वेदादिभावापन्नं तथा हरिरेव प्रमेयं सर्वभावापन्नम् इति**" (त.दी.नि.प्र.२।८४) इति. तेन अन्येष्वेव हि मार्गेषु एतेषां प्रमाणप्रमेयादीनां प्रभेदः. स्वमार्गेतु वाक्पतेः वचनैः असंस्कृतमतिभ्यएव आत्यन्तिको भेदो रोचते, आचार्योपदिष्टोल्लंघनदुर्वासनातः ततश्च प्रमेयमार्ग-फलमार्गपार्थक्यमपि, रोचते तेभ्यो नच एवं निजाचार्यवचनानुगामिभ्यः.

ततएव भगवद्प्रवर्तकतां पुरस्कृत्य सर्वेऽपि अन्येषां वादिनां मतेषु प्रतिपन्नाः ये केचन विध्यर्थाः "**तान् सर्वान् एकहेलया स्वमतेन दूषयति कृष्णस्यैव प्रवर्तकत्वं न विध्यर्थस्य, काकतालीयतया पूर्वभावो न हेतुत्वसाधकः. अव्यभिचारस्तु विध्यादीनां नास्ति**" (त.दी.नि.प्र.२।१७७) इत्येवं निरूप्यापि "**साधनानि स्वरूपं च सर्वस्य आह श्रुतिः फलम्. न प्रवर्तयितुं शक्ताः तथा चेत् नरको नहि... अतो वेदेऽपि स्वरूपप्रतिपादकत्वाद् न प्रवर्तकत्वं किन्तु सर्वस्यापि साधनं फलं च आह. तावतैव प्रवर्तकत्वं यदि तदा 'ओम्' इति ब्रूमः**" (त.दी.नि.प्र.२।१८०) इति निरस्तोऽपि स्वरूपपक्षः भगवत्प्रवर्तकतावान्तरव्यापारतया पुनरपि प्रस्थापितः. मन्ये तदेतद् उपलक्षणतया खलु स्वीकर्तव्यम् अन्येषामपि विध्यर्थपक्षाणां भगवत्प्रवर्तकतावान्तरव्यापारतयातु अंगीकारे बाधाभावस्यैव उपोद्बलकत्वात्. यथाच उच्यते "**यत्र येन यतो यस्य यस्मै यद् यद् यथा यदा स्याद् इदं भगवान् साक्षात् प्रधानपुरुषेश्वरः**"(त.दी.नि.१।६९) इति. अतएव भगवदिच्छानुग्रहयोरेव सर्वत्र मुख्या साधनता. शास्त्रोपदिष्टानां येषां केषाञ्चिदपि वैराग्यसांख्ययोगतपसां वा भक्त्युपासनातीर्थाटानानां वा यज्ञदानादिरूपाणामपि साधनानां साफल्ये तदनुग्रहावान्तरव्यापाररूपतैव अतो अभिमता. तथा वैफल्येऽपि तदिच्छैव मुख्यो हेतुः इति सिद्धान्तः.

सति चैवं शाब्दिकार्थिकादिभेदोपभेदैः विधेः ये बहवो पक्षाः भवन्ति तेषाम् आवश्यकतापक्षेऽपि अतिदेशांगीकारेतु तत्रापि ते भेदोपभेदाः कुतो न सम्भवेयुः ? अतोहि आवश्यकताबोधस्यापि प्रवर्तकत्वाप्रवर्तकत्वेऽपि भगवदनुग्रहेच्छाधीनेएव इति मन्तव्यम्. यथा स्वमार्गे श्रीकृष्णसेवायाः स्वतनुवित्तजात्वधर्मो विहितो वा आवश्यको वा इति विचारे भगवता पुष्टिभक्तिफलदानार्थं जीवस्य वरणे कृते सति सः निर्वोढुं शक्यो नच अन्यथा. यस्माद् भगवदिच्छावैपरीत्येतु श्रीमन्निजाचार्यवंशजाअपि देवलकतागर्ते पतिताः सन्तो भगवत्सेवादर्शनार्थिजनानां वित्तैः वित्तजां, वैतनिकभृत्यानां तनुभिः तनुजां कुर्वाणाः केवलं श्रीकृष्णसेवाप्रदर्शनपराः सन्तो स्वलाभपूजामात्रं प्रवर्धयन्तो अधुना उपलभ्यन्ते. तदेव प्रभुचरणेन सुष्ठु निरूपितम् :

**१.''‘कृष्ण’सेवा इति फलात्मकनामोक्त्या स्वतः पुरुषार्थत्वेन सेवाकृतिः स्वसिद्धान्तो नतु अन्यशेषत्वेन ( निजलाभपूजाप्रवृद्ध्यर्थं वित्तदातृशिष्योद्धारार्थं वा ) इति ज्ञाप्यते. सेवा हि सेवकधर्मः तदुक्त्या जीवानाम् अशेषाणां सहजदासत्वं ज्ञापितम्. अतएव न कर्मणीव अत्र कालपरिच्छेदो अस्ति इति आहुः ‘सदा’ इति. आवश्यकार्थ‘ण्यत्’प्रत्ययान्त‘कार्य’पदोक्त्या तदकरणे प्रत्यवायी भवति...''**

**२.''एतेन भक्त्यर्थिषु सदाचारोच्छेदप्रसंगः इति दूषणं निरस्तं वेदितव्यं, येषु जीवेषु यथा भगवदिच्छा तथैव तेषां प्रवृत्तेः आवश्यकत्वात्''.**

**३.''तत्र त्रिवर्गकामेन क्रियमाणः श्रवणादिः कर्ममार्गीयएव, तत्रापि अर्थाद्यर्थिभिः विहितत्वेन कृतः चेत् स तथा. वृत्त्यर्थं चेत् कृषिवद् लौकिकएव, शौचार्थिगंगास्पर्शवत् च. नहि तस्य मलनिवृत्यतिरिक्तो धर्मः उत्पद्यते प्रत्युत निषिद्धाचरणात् पापमपि''.**

( सि.मु.वि.१, भक्तिहेतुनिर्णये तथा भक्तिहंसे ).



हन्त! सति चैवं मर्यादाप्रवाहमार्गीयजीवानामपि पुष्टिमार्गीयरीत्या भगवत्सेवायाः अकरणे अकरणरूपः प्रत्यवायो भवति चेत् तदा पुष्टिजीवानामपि मर्यादामार्गीयितरदेवार्चनाद्यकरणे प्रत्यवायिता कुतो न ? अथ यथोपदिष्ट-तनुवित्तज-सेवायाः अकरणेऽपि पुष्टिमार्गानुगामिनां भक्तिमार्गीयत्वेन न प्रत्यवायिता भवेत् तदा अन्यान्यमार्गानुगामिनामपि भगवत्सेवाद्यकरणेऽपि प्रत्यवायो मा भूत्, भिन्नमार्गांगीकृतेः तुल्यत्वात्. अथ यद् न्यूनाधिकं भगवानेव पूरयति इति हेतुः तदा मार्गान्तरेष्वपि कुतो न तथा ?

अत्र अयं सैद्धान्तिकः आशयः प्रतिभाति : अशेषजीवानां भगवद्दासत्वेन भगवत्सेवायाः या सहजधर्मत्वोक्तिः तस्य तथात्वेऽपि भगवतैव मनसा प्रावाहिकी, वचसा मार्यादिकी, धर्मिस्वरूपेण पुष्टिसृष्टिः प्रादुर्भावितेति सच्चिदानन्दब्रह्मणः चिदंशदृष्ट्या भगवत्सेवायाः सहजधर्मत्वेऽपि विभिन्नमार्गेषु जीवानां भगवत्कृतवरणेन यस्मिन् मार्गे यो जीवो भगवता अंगीकृतः तन्मार्गीयधर्माणामेव तदुत्तरं तस्य कृते सहजधर्मता. तथाच चिदंशानां तत्तन्मार्गेषु अंगीकारात् पूर्वं ये गुणदोषाः तेषां लीलायाम् अन्यथाकरणं भगवदीप्सितमेव. पुष्टिमार्गेतु अंगीकृतानां जीवानां भगवत्सेवायाः सहजधर्मत्वोक्तिः नहि वैष्णवकुले आचार्यकुले मनुष्यदेहधारितया पुरुषरूपतया स्त्रीरूपतया वा जन्मग्रहणमूलिका, नृदेह-लिंग-कुल-वर्णादयस्तु **''प्रवाहेऽपि समागत्य पुष्टिस्थः तैः न युज्यते सोऽपि तैः तत्कुले जातः कर्मणा जायते यतः''** (पु.प्र.म.२६) इत्युक्तेः पूर्वजन्मकृतकर्मवशादेव अंगीकृताः. नापि बाह्याभ्यन्तरकरणोपहितसूक्ष्मशरीरवद्जीवतया भगवत्सेवायां वैकुण्ठादिषु सेवौपयिकदेहोपलम्भे अननुवर्तनात्. तस्माद् जीवानां ब्रह्मणः चिदंशत्वं यथा निरुपाधिकं तथा भगवत्सेवापि निरुपाधिकः स्वधर्मः. अन्यमार्गीयजीवानां सृष्टिलीलायां भगवदभिलषितप्रकारेण, स्व-स्वकर्मणा नृदेह-लिंग-वर्णादिविशिष्टदेहावाप्तिः वा पशुपक्षिमीनकीटादिभेदैः शरीरावाप्तिः वा भवेत् तथानुगुणो स्वधर्मभेदो भवति. एतावता पुष्टिजीवानामपि अन्ये धर्माः देहाद्युपाधिमूलकाएव नतु अनौपाधिकाः. भगवत्सेवातु पुनः निरुपाधिको धर्मः. तस्माद् यथा तस्य निरुपाधिकतायाः भंगो न भवेत् तथा यत्किमपि न्यूनं वा अन्यथा वापि जातं सकलं भगवता सम्पूर्यते.

निरुपाधिकताभंगे तु बाह्यरूपेण भगवत्सेवायां तादृग्रूपवत्त्वेऽपि नैव आत्मधर्मतेति **''भगवत्कृत: चेत् प्रतिबन्ध: तदा भगवान् फलं न दास्यतीति मन्तव्यम्. तदा अन्यसेवापि व्यर्था तदा आसुरो अयं जीव: इति निर्धार:''** ( सेवाफ.विव.३ ) इति उक्ते:. अन्यथाकरणे खलु निषिद्धाचरणात् पाप्मनोऽपि प्रतिपादितत्वादेव. तस्मात् शास्त्रविहितानां वा भवतु शास्त्रोपदिष्टावश्यकानां वा कर्मणां भवतु अकरणे प्रत्यवायिता समानैव.

ननु को भेद: तदा अवशिष्यते द्वयो: यावता उभयत्र प्रवर्तकतातु भगवतएव न वचनानाम् ? इति चेद्, विहितत्वेतु भगवत्प्रदत्ताहंकारोपाधिकज्ञाने-च्छाप्रयत्नानां लीलेच्छया प्रकटितं स्वल्पस्वातन्त्र्यम् अनुभूयते. न तत्र भगवत्कृपाया: कश्चन मुख्यो व्यापार:. आवश्यकतया उपदिष्टस्य धर्मस्य निर्वाह्यत्वे भगवदनुगृहीतमतिकृतिरतीनां जीवानां भगवत्कृपयैकावभात: आवश्यकतासम्प्रत्ययो जायते नच स्वस्वातन्त्र्यम् इति प्रभेद:. तद् उक्तं **''भक्त्यभावेतु तीरस्थो यथा दुष्टै: स्वकर्मभि: अन्यथाभावम् आपन्न: तस्मात् स्थानात् च नश्यति. 'भक्त्यभावे' इति भगवत्सांनिध्यदेशेऽपि स्थितौ भक्त्यभावे तथा भवति इति भाव:. एतेन भक्ते: आवश्यकत्वम् उक्तं भवति''** ( सि.मु.वि.२० ) इति आचार्याशयस्फुटीकुर्वाणै: प्रभुचरणै:. अतएव उच्यते **''भगवदिच्छाभावेऽपि भजने, भजनमेव परं निर्वहेद् नतु अनिष्टं किञ्चिद्''** ( त.दी.नि.प्र.२।२७१ ) इति भक्तिमार्गस्य अनुग्रहैकमूलकत्वेन **''ब्रह्मादिदुर्लभ-कथं राधामानापनोदकं कृष्णं तदनुग्रहैकलभ्यां भक्तिं नुम: तदीयान् च''** ( भक्तिहे.नि. ).

ननु किम् एतावता निष्पन्नं भवेद् यावता कोहि अस्या: राजभोगारात्रिकार्याया: गाने युक्तो अधिकारी इति निष्कृष्टतया न उच्येत ?

श्रूयतां यद्धि विवक्षितम् अस्मिन् विषये महाप्रभो:. यतो नहि देवलकानां तदनुगामिमूढानां वा अन्धानुगान्धपरम्परा इह पुष्टिभक्तिमार्गे प्रामाण्यपदवीम् आरोढुम् अर्हति. भक्तिमार्गेतु भगवत्सेवाकृते गुरूणां



श्रीमन्महाप्रभु-प्रभुचरणानामेव आज्ञा प्रमाण, न जातु आधुनिकानां देवलकीभूतानां तद्वंशजानाम्.

तैस्तु निजोपदेशेषु निरूपितो अधिकारी इत्थम्भूतएव —

**१.''अच्छिद्रसेवनात् चैव निष्कामत्वात् स्वयोग्यत:. ननु प्रेम दृष्टे भवति, सर्वथा अदृष्टे कथं प्रेम इति आशंक्य दर्शनोपायम् आह 'अच्छिद्रसेवनाद्' इति. सेवनं स्वयोग्यानुसा-रेण नतु अल्पं बहु वा प्रयोजकम्''.**

**''स्वयोग्यप्रकारं बोधयितुं 'स्वयोग्ये'इति व्याकुर्वन्ति 'सेवनम्' इति. बहुकरणे भगवति भारेण अल्पकरणे कापट्येन छिद्रसम्भवाद् इति अर्थ:''.**

**२.''वाक्येन प्रवृत्त: साधनम् असाधयन्नपि भगवता कृतार्थीक्रियते... प्रमाणप्रवृत्तिम् आरभ्य भगवतो रक्षकत्वात्''** ( १.त.दी.नि.प्र.२।३१६ तत्रैव आव.भंगे. २.तत्रैव २।२२२ ).

एतावता य: कोऽपि भगवत्सेवापर: पुष्टिभक्तो भगवतो नीराजनकरणे समर्थ: सएव अत्र अधिकृत:. यस्तु केनापि कारणेन असमर्थ: स भावनया एतदार्याया: केवलगानेन वा भजनपरो भवेत्. यस्तु पुन: संस्कृतभाषोच्चरणेऽपि असमर्थ: सोऽपि **''मोहन मदनगोपालकी आरती''** ( कृष्णदा.कृतपदा.१४५ ) इत्येवमादिभाषापद्यैरपि नीराजनकाले भक्त्यनुभावरूपं गानं कर्तुम् अर्हत्येव.

नच उपदिष्टप्रकारेण अन्यथाकरणे फलाभाव: आपादनीय: विहितकर्मानुष्ठानेऽपि **''यस्य स्मृत्या च नामोक्त्या तपोदानार्चनादिषु न्यूनं सम्पूर्णतां याति सद्यो वन्दे तम् अच्युतम्''** इति कर्ममार्गेऽपि भक्त्या भगवदभिवन्दनं न्यूनाधिकदोषपरिहारकं भवति यदा तदा तादृश्यां भक्तौ तत् कुतो न सम्भवेत् ? नच सति चैवं तनुवित्तजाया: अकरणेपि विभज्य च तनुजा आहोस्विद् वित्तजा सेवापि भक्त्या अनुष्ठिता चेद् भगवान्

कुतो तनुवित्तजतया तां सम्पूर्णां न सम्पादयिष्यति इति वाच्यं, यस्तु एवं भगवत्सेवाम् अनुष्ठातुं न शक्नोति तस्य कृते भगवत्कथाधिकारस्य उपदिष्टत्वात्. अन्यथा अनधिकारेऽपि तथा अनुष्ठाने कदाचित् स्वोच्छिष्टं गोपसखायो भगवते ददति स्म तथा स्वोच्छिष्टनैवेद्यनिवेदनेऽपि निरागसं स आत्मानं मन्येत! तत्तु "**न मतं देवदेवस्य सामिभुक्तसमर्पणम्**" (सिद्धा.रह.५) इति वचनेन निषिद्धत्वाद् न भगवत्सेवापरेण कल्पयितुमपि शक्यम्. अन्या हि अवतारकालिकी लीलाकथा अन्याच पुन: अनवतारकालिकभक्तै: साकं भगवतो भजनीयरूपस्य लीलाकथा. नचैतावता 'गोमयपायस'न्यायो अनुकरणीय:.

किञ्च श्रीमदाचार्यचरणा: स्वसम्प्रदाये भगवत्प्रमेयबलमेव स्वमार्गे सर्वथा नियामकतया स्वीकृत्य "**सर्वथा चेद् हरिकृपा न भविष्यति यस्य हि, तस्य सर्वम् अशक्यं स्याद् मार्गे अस्मिन् सुतरामपि, कृपायुक्तस्यतु यथा सिद्ध्येत् कारणम् उच्यते**" (त.दी.नि.२।२२६) इति कारणनिरूपणपुरस्सरं कतिपयान् भगवत्कृपैककरणकान् अवान्तरव्यापाररूपान् तांस्तान् उपायानपि तत्र प्रतिबन्धकान् चापि उपदिष्टवन्त:. तेषाम् एतेषाम् उपायोपदेशानां स्वसम्प्रदाये विधिनिषेधबलानंगीकारे भृशम् आनर्थक्यमेव प्रसज्येत. सार्थक्ये तु एतैरेव उपायै: अनुष्ठीयमानै: अधुना भगवत्संगोपलब्धि: सुशका इति. इयमीदृशी हि वाक्पतिनो भगवन्मुखावतारेण श्रीवल्लभेन समुपदिष्टा साधनासरणी. अवतारिणो भगवत: श्रीकृष्णस्यतु किल कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वेन असाधनमपि साधनं, साधनं च असाधनं, कर्तुं सर्वविधसामर्थ्यवत्त्वेन प्रमेयबलं विधिनिषेधनिरपेक्षमेव. तेन अनवतारकाले पुष्टिलीलामार्गे अनन्यावलम्बनाय य: खलु भगवत्प्रपत्त्यै उपनीत: तस्य च कृपैकावान्तरव्यापाररूपेषु उपायेषु मार्गाचार्यै: नियोजनम् "**यथा सौम्य! पुरुषं गन्धारेभ्यो अभिनद्धाक्षम् आनीय तं ततो अतिजने विसृजेत्... तस्य यथा अभिनहनं प्रमुच्य प्रब्रूयाद् 'एतां दिशं गन्धारा-एतां दिशं व्रज' इति स ग्रामाद् ग्रामं पृच्छन् पण्डितो मेधावी गन्धारानेव उपसम्पद्येत. एवमेव आचार्यवान् पुरुषो वेद**", "**यो अन्तर्बहि: तनुभृताम् अशुभं विधुन्वन् आचार्यचैत्यसपुषा स्वगतिं व्यनक्ति**"



(छान्दो.उप.६।१४।२, भाग.पुरा.११।२९।६) इत्येवमादिश्रुतिपुराणवचनेभ्य:.

तस्य अधिकारिण: स्वरूपं आचार्यज्येष्ठात्मजै: प्रभुचरणै: "**पुरुषस्य अविशेषेण**" इत्यारभ्य मध्ये "**माहात्म्यज्ञापनायैव श्रवणं गुणकर्मणां शास्त्राणाम् उपयोगो अत्र, तत्र आकांक्षा गुरो: भवेत्. कृष्णसेवापरं वीक्ष्य दम्भादिरहितं नरं श्रीभागवततत्त्वज्ञं भजेद् जिज्ञासु: आदरात्**" इति श्रेयस्कामेन यथोक्तलक्षणवतो गुरो: उपलम्भे सति तस्य गुरोरपि कर्तव्यतया "**अनुग्रहे नियोज्यो अत: संग्रह: श्रुतिसंमते:, महतां समयो मानं महान्तो अत्र हरे: प्रिया:**" (साध.दीपि.७-५५) अधिकारिस्वरूपनिर्धारपूर्वकं तादृक्स्वरूपवतो अधिकारिण: कर्तव्यतया "**ततो राजविभूतीनाम् आदर्शै: चामरै: भजेद् गीताद्युत्सवतो हि एनं नीराज्य च प्रणम्य च**" (साध.दीप.११३) इति नीराजनविधि: उपदिष्टइति, विहितो हि भगवतो नीराजनस्य मध्याह्नसेवायां विनियोग: तत्र यद्यपि आर्यागानोल्लेखो नोपलभ्यते तथापि "**विधिमन्त्रयो: ऐकार्थ्यं प्रवर्तकत्वम्. तत्र हेतु: 'ऐकशब्द्याद्'... अपिवा प्रयोगसामर्थ्याद् मन्त्रो अभिधानवाची स्यात्... मन्त्रो अभिधानवाची केवलं धर्मप्रमितिमेव जनयति न विधायक:... प्रयोगे प्रवृत्तस्य व्यापारनिश्चयो विधिस्तु पूर्वसिद्ध: तेनैव प्रवृत्तत्वात् कृतिसमये... प्रमितिमेव जनयति**" (भावा.पा.भा.२।१।३०-३१) इति न्यायेन नीराजनौपयिका भक्तिभावनां प्रमापयति. तेन अत्र नीराजनविधे: तन्मन्त्रोपमाया: आर्याया: च भजनविधि: अधिकारिविधि: च मिथ: एकवाक्यतया अवगम्यते.

अतोहि अनुग्रहमात्रसापेक्षे हि एतस्मिन् सम्प्रदाये प्रथमावलम्बनीयतया नि:साधनभावेन शरणागति: समर्पणं भगवत्सेवा भक्त्यौपयिक: सर्वात्मभाव: च अपेक्ष्यन्ते. तत्र चतुर्ष्वपि एतेषु उपायेषु यथायथं श्रुतिस्मृतिपुराणतन्त्रादिशास्त्रोक्तान् विधिनिषेधानपि आचार्यो अस्माकं योजयामास. एतेन जीवात्मसु परमात्मना अनुग्रहे कर्तव्ये जीवानुष्ठितोपायानां भगवतो नैभर्यं नास्ति, तेषामेव उपायानां भगवदुपलब्धौ भगवदनुग्रहैकनिर्भराणां जीवानां भगवत्संगोपलब्धये शास्त्रोक्तविधिनिषेधावपि नात्यन्तम् अनुपादेयौ भवत:. ततएव सर्वात्मभावेन

अनन्यशरणागते: उपदेशं प्रथमं तावत् चकार. तस्मात् शास्त्रोक्तकर्तव्यनैर्भर्यं न जीवात्मनां निजाहंकारनैर्भर्यं निजममकारहेतुकफलेप्सानैर्भर्यं वा अपेक्ष्यते. अपेक्ष्यतेतु भगवदाज्ञप्तानां ज्ञानकर्मभजनकथादिधर्माणामपि भगवद्रूपत्वेनैव नैर्भर्यमिति भगवदितरनैर्भर्यशंकापिशाची न क्वापि इह अनन्यशरणागतेषु जीवात्मसु प्रभवति इति आविश्चकार. तथाच उक्तं ''**ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणो द्वयोरपि एकएव अर्थो 'भगवच्' छब्दलक्षण:**'', ''**कालेन नष्टा वाणी इयं 'वेद'संज्ञिता मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मक:**'' ( भाग.पुरा.३।३२।३२ , ११।१४।३ ) एतेन त्रयाणामपि कर्मज्ञानभक्तिरूपोपायानां भगवदात्मकतां निराबाधां जानन् निजाहंकार-ममकाराभ्यां तान् अशबलीकुर्वन् सर्वात्मभावेन भगवच्छरणागतो जीवो अनन्यभावेनैव भगवन्तम् आश्रयति भजति च. सएव अधिकारी एतदार्यागानस्य इति सुस्पष्टम्.

अथ केवलप्रमेयबलेनैव भगवत्प्राप्ति: सुलभायते चेद् मार्गेऽस्मिन् पुष्टिमार्गीयगुरो: सकाशात् शरणागति-ब्रह्मसंबन्ध-दीक्षयोरपि अनावश्यकता भगवत्सेवाकथादेरपि अकिञ्चित्करतैव सिद्ध्येदिति एतदुपदेशमूलकतया सर्वनिराकरणेन पुष्टिभक्तिसम्प्रदायप्रवर्तनेन महाप्रभोरपि एतै: अहोभावुकै: पुष्टिसम्प्रदायस्यैव अजागलस्तनरूपता प्रसाधिता हन्त !

तेन य: कश्चन स्वमार्गीय: स्वगृहाधिष्ठितभगवद्विग्रहसपर्यायां स्वतनुवित्तपरिजनविनियोगे तत्पर: आत्मनिवेदी सो अत्र अधिकारित्वेन संगृह्यते. ननु साधनदीपिकाकारै: द्विजभक्तानां कृते किल एतादृश: क्रमो दर्शित: अद्विजानां कृतेतु ''**शूद्रस्तु हिंस्रकार्येण निषिद्धस्य अशनेन च निवृत्त्या असौ भजेत् कृष्णं महद्भि: अनुकम्पित:, सहितं हरिभक्तानां ब्राह्मणानां...पादसेवा च महताम्**'' ( साध.दीपि.७४-७५ ) इति भगवत्सेवानुकल्पतया द्विजभक्तानां सेवैव तेषां कृते आदिष्टा. अधुनाच प्रायश: सर्वेषां अद्विजप्रायस्त्वेन न भगवत्सेवायां तेषां कृते नीराजनानुज्ञा मन्तुं शक्या, ऋते गुरुभूतगोस्वामिनाम् आचार्यकुलोद्भूतानाम् इति चेद् न, अधुनातु आचार्यवंशजाअपि प्राय: निजपरिवारोदरपोषणाय आजीविकार्जनोपायत्वेन



भगवत्सेवाप्रदर्शका: जघन्या: देवलका: सञ्जाताइति अद्विजेभ्योऽपि अपावित्र्याधिक्यहेतो: अनधिकारिणएव सिद्ध्येरन्. अतो नीराजनकर्मणि तेषामपि अधिकारपराहति: अर्थाक्षिप्ता अवगन्तव्या. वस्तुतस्तु ''**हरिमेव भजेत् प्रेम्णा तेन शुद्ध्यति सत्वरं न वेदश्रवणं कार्यम्**'' ( साध.दीपि.७६-७७ ) इति अद्विजानामपि नीराजनाद्यंगोपांगविशिष्टे श्रीहरिभजने अधिकारो न न अभ्युपगतएव. ग्रन्थोत्तरभागे मंगलाराजभोगसायंशयननीराजनविधौ रजस्वलानां द्विजस्त्रीणामिव तथा अशुचिपुंसामिव च अद्विजानां भगवन्मूर्तिदर्शनस्पर्शननिषेधाश्रवणेन दोषाभावात् च. एतेन भगवत्प्रसादविक्रयार्थं दर्शनार्थिजनतातो द्रव्यग्रहणेन अस्वीयबहुनैवेद्यार्पणरूपां भगवत्सेवां निर्वहतान्तु यदि द्विजत्वमेव तावद् नोपपद्यते, तदा गुरुत्वस्यतु कथैव का? तथाहि ''**लवणं तनया लाक्षा पतनीयानि विक्रये पयो दधि मद्यं च हीनवर्णकराणि तु**'' ( याज्ञ.स्मृ.३।३।४० ) ''**सद्य: पतति मांसेन लाक्षया लवणेन च, त्र्यहेण शूद्रो भवति ब्राह्मण: क्षीरविक्रयात्**'' ( मनुस्मृ.१०।९२ ) इति अलम् कर्तुमकर्तुमन्यथाकर्तुं समर्थस्य भगवतो हि पुष्टिसम्प्रदायेऽपि प्रावाहिकजीवानां प्रकटीकरणलीलावशाद् जातानां पुष्टिलीलान्त:पातिनाम् अस्मदीयानां स्वरूपविमर्शेन. तद् उक्तं प्रभुचरणै: ''**कृत्याकृत्यं न जानाति धर्माधर्मं तथा पुन:... भ्रान्त: चेद् भवति प्राय: स 'प्रावाहिक:' उच्यते. तस्मात् प्रावाहिका भक्ति: न कर्तव्या कदाचन. विचारो अत्र न कर्तव्य: श्रीमदिच्छा बलीयसी**'', ''**निवेदितात्मभिन्नेषु सदा औदासीन्यम् आचरेत्. प्रावाहिका: तेऽपि चेत् स्यु: उपेक्षैव उचिता तदा**'' ( भक्तिजीव.५-८ , रक्षास्म.६-७ ) इति.

### ( " किम्प्रयोजनकं च एतद्गानम् ? )

सिद्धो हि अधिकारीति इत:परं प्रयोजनं खलु विचारणीयम् : सेयं राजभोगारात्रिकार्याया: भगवतो निरोधलीलासामयिकस्वरूपवर्णनपरत्वं प्रयोजनांगतया च प्रसाधनीयं ''**भक्त्यन्ते भगवान् साक्षाद् आविरासीद् इति ईर्यते, भक्तिवद् रूपसम्पत्त्या सर्वान् मोचयितुं क्षम:...वस्तुत: सकला भक्ति: पुष्टावेव उपयुज्यते पुष्टौ रूपं पराकाष्ठा... निरोधो अस्य अनुशयनं प्रपञ्चे क्रीडनं हरे:, शक्तिभि: दुर्विभाव्याभि: कृष्णस्य... भक्ता: पूर्वत्र**

**निर्दिष्टाः ते रोद्धव्या विमुक्तये. कृष्णे निरुद्धकरणाद् भक्ताः मुक्ताः भवन्ति हि भक्तेः च शुद्धयतासिद्धयै प्रपञ्चाद् विनिवारणम्. आसक्तिः आत्मनि तथा निरोधार्थं न संशयः''** (त.दी.नि.३।९।१७२-१७६ ,१०।१४-१७) इति महाप्रभुवचनानुरोधात्. तस्याश्च पुनः निरोधलीलायाः **''तस्माद् जीवाः पुष्टिमार्गे भिन्नाएव न संशयः भगवद्रूपसेवार्थं तत्सृष्टिः न अन्यथा भवेद्''** (पु.प्र.म.१२) इति वचनादपि पुष्टिसृष्टौ उत्पन्नस्य जीवस्य तदुद्धारकस्य भगवतश्चापि अन्योन्यस्मिन् अनिरोधे भगवद्रूपेण उद्धारएव न स्यादिति, पुष्टसृष्ट्युद्धारके भगवतो बाह्याभ्यन्तररूपयोः पुष्टिभक्तानां च तस्मिन् सर्वतो निरोधसम्पादकं गुणगानं आर्यामिषेण यत् प्रकटीकृतं तदर्थानुसन्धानाय उपक्रमणीयम्.

आरात्रिकार्यायाः प्रयोजनन्तु आर्यान्तिमे चरणे **''रतिः अस्तु मम व्रजराजसुते''** इति कण्ठोक्तमेव तावद् अवधारणीयम्.

नच भगवत्प्रेमसेवातएव एतस्याः सिद्धत्वेन आर्यापाठेन सेवायां विशेषाधानानवधारणाद् अत्यल्पम् इदम् उच्यते! इति वाच्यं, नहि व्रजराजसुते सामान्यरतेः आशंसा इह प्रभुचरणैः प्रकटीकृता किन्तु अनितरसाधारणायाएव! सातु विशेष्यीभूतव्रजराजसुते प्रमाण-प्रमेय-साधन-फलभेदैः तद्बाह्याभ्यन्तरस्व-रूपलीलानुभूतौ अतिशयितनिरोधरूपैव. अतोहि एतस्याएव त्रयोदशविशेषणैः विशिष्टायाः भगवद्रतेः अतिशयिताशंसा इह विद्योतिता. साचेयं पुष्टिभक्तिमार्गे फलात्मकनिरोधरूपा **''ज्ञानन्तु गुणगानं हि परोक्षे तत् प्रतिष्ठितं प्रत्यक्षे भजनं श्रेष्ठम् एवं चेद् रोधनं स्थिरम्''** (त.दी.नि.३।१०।११०-१११) इति वज्रभक्तानां फलात्मकनिरोधतया महाप्रभुभिः प्रतिपादितेति. यस्माद् **''...भगवति तस्मिन् वासुदेवे एकान्ततो भक्तिः... यस्यामेव... परया निर्वृत्त्या हि आपवर्गिकम् आत्यन्तिकं परमपुरुषार्थमपि स्वयमेव आसादितं नोएव आद्रियन्ते भगवदीयत्वेन परिसमाप्तसर्वार्थाः''** (भाग.पुरा.५।६।१६-१७) इति भगवदीयतायाः अनितरसाधारणं माहात्म्यं भक्तिमार्गे अंगीचकार श्रीमद्भागवतकारः. तत्र साधनात्मकनिरोधापेक्षायामपि तद् भगवदीयत्वं पुनः



**''पुष्टिमार्गे हरेः दास्यं धर्मो अर्थो हरिरेव हि कामो हरिदिदृक्षैव, मोक्षो कृष्णस्य चेद् ध्रुवम्''**, **''अतः सर्वात्मना शश्वद् गोकुलेश्वरपादयोः स्मरणं भजनं चापि न त्याज्यम् इति मे मतिः''** (वृत्रा.चतु.व्या.१ , चतुश्लो.४) इति श्रीभागवत-महाप्रभ्वोः वचनयोः ऐकवाक्यानुरोधाद् भक्तिमार्गीया जीवन्मुक्तिरेव अवतारानवतारकालसाधारणी. इह साधनफलयोः ऐक्यबोधानात् तदुपलब्धिनान्तरीयकैः लौकिकप्रमाणोपकरणैः स्वज्ञानेच्छाप्रयत्नरूपैः, तथैव अलौकिकप्रमाणोपकरणैः ज्ञानभक्तिकर्मरूपैः, अवगम्यमानं प्रमेयमपि मिथः एकवद्भावापन्नमिति अर्थापत्त्यैव लभ्यतइति. एवं चतुर्णामपि भगवति निरोधैकपर्यवसायित्वेन तस्याएव आशंसा इह ''रतिः अस्तु'' इत्यनेन प्रतिपादिता. तथाहि :

**(नन्दगोपव्रजे प्रादुर्भूतस्य भगवतो भक्तनिरोधकृद्-बाह्यस्वरूपगुणगानं द्वाभ्याम्)**

इह श्लोकद्वयेन ऐश्वर्यादिषड्धर्मोपेतो धर्मी सप्तभिः विशेषणैः विशिष्टो निजबाह्यस्वरूपेण संयोगसुखानन्ददानपरो व्रजराजसुतो गीयते, **''बाह्याभावेतु आन्तरस्य व्यर्थता''** (सुबो.१।६।०।२) इति वचनात् :

**व्रजराज - विराजित - घोषवरे वरणीय - मनोहर - रूपधरे**[धर्मी] ॥
**धरणी-रमणी-रमणैकपरे**[ऐश्वर्यं] **परमार्ति-हर-स्मित-विभ्रमके**[यशः] ॥१॥
**मकराकृति-कुण्डल-शोभिमुखे**[ज्ञानं] **मुखरीकृत-नूपुर-हृद्यगतौ**[श्रीः] ॥
**गतिसंगत-भूतलताप-हरे**[वीर्यं] **हरशक्र-विमोहन-गानपरे**[वैराग्यं] ॥२॥

**व्रजराज-विराजित-घोषवरे** इति अक्षरब्रह्मात्मके नन्दगोपव्रजे इति अर्थः. नच प्राकृतप्रपञ्चस्यैव अक्षरब्रह्मात्मकत्वे अभ्युपगते व्रजराजविराजितघोषे को विशेषः ? इति आशंकनीयम्, **''यो नन्दः परमानन्दो यशोदा मुक्तिगेहिनी... गोकुलं वनवैकुण्ठं... गोपरूपो हरिः साक्षाद्''** (कृष्णोप.३-१०) इति उपनिषदा **''अह्न्यापृतं निशि शयानम् अतिश्रमेण लोके विकुण्ठ उपनेष्यति गोकुलं स्म''** (भाग.पुरा.२।७।३१) इति श्रीभागवतेनापि व्रजस्य नूतनं

किमपि वैलक्षण्यं भगवत्प्रादुर्भावहेतुकं प्रसाधितमेव. अतएव **''तत आरभ्य नन्दस्य व्रजः सर्वसमृद्धिमान् हरेः निवासात्मगुणैः रमाक्रीडम् अभूद्''**, **''नृणां निःश्रेयसार्थाय व्यक्तिः भगवतो नृप! अव्ययस्य अप्रमेयस्य निर्गुणस्य गुणात्मनः''** (भाग.पुरा.१०।५।१८, १०।२६।१४) इति दशमे निरूपितम्. ननु भगवत्प्रादुर्भावस्तु तत्र जातो वर्णितश्च इति तत्क्रीडम् अभूद् इति युक्तं तत्स्थाने रमाक्रीडम् अभूद् इति निरूपणस्य को हेतुः ?

तदेतद् महाप्रभुणैव समाहितं :

> **''यदा भगवान् स्वशक्तिरूपेण आविर्भूतः तदा शक्तीनां मध्ये श्रीः प्रथमा. सा शरीरएव बलवत् पूर्वं स्थिता. यदा भगवान् प्रभुत्वेन आविर्भूतः तदा सापि भोग्यत्वेन आविर्भूता भार्येव... तस्याः शरीरन्तु ब्रह्मानन्दरूपं... साहि अक्षरस्य आनन्दरूपा... यदा भगवान् स्वभोगार्थं जगत् करोति तदा सर्वं लक्ष्मीरूपमेव करोति... अनेन अवतारेषु भोग्या लक्ष्मीरूपाएवेति स्वरूपतः आवेशतो वा''**.
>
> (सुबो.२।९।१३-१४)

तस्माद् नन्दगोपेन अलंकृतस्य घोषस्य दिव्यं श्रैष्ठ्यं चकास्ति, तत्र **वरणीय-मनोहर-रूपधरे** इति, धर्मीभूतस्य नटवरवपुषो भगवतो रूपद्वयम् इह निरूपितम्. आद्यं प्रत्यग्रभोक्तृभूतवररूपं बाह्यं तावद् 'वरणीय'पदेन. द्वितीयं रसनाटनपरं आन्तरं परोक्षं 'मनोहर'पदेन. तत्र द्वितीयेन पदेन विप्रयोगात्मकसाधनरूपा निरोधकारिता व्रजलीलायां भगवद्गृहीते रूपे द्योतिता. आद्येन 'वरणीय'पदेन संयोगात्मकफलरूपा निरोधकारिता च. रूपे मनोहरत्वं इतरासक्तिनिवारणेन हठात् स्वासक्तिसम्पादकत्वं यथाच अस्मत्तातचरणसुहृद्भिः प्रतिवादिभयंकर-रामानुज-पीठाधिष्ठितैः श्रीमद्भिः अण्णंगराचार्यैः तातचरणाय ग्रन्थोपायनलेखतया तत्र लिखितं **''गणिविडम्बनि तस्य मनोहरे वपुषि मग्नमना मुनिमण्डिली जपम् अमुञ्चत होमम् अमुञ्चत व्रतम् अमुञ्चत सर्वम् अमुञ्चत''** इति. इत्थम्भूतेन रूपेण तावद् मनसो हरणं न मनःस्वभावानुपाति



किमुत त्रैलोक्यसौभगमनोहररूपवैशिष्ट्यानुपात्येवेति इतरासक्तिवारणेन निरोधपूर्वांगसम्पत्तिः उक्ता. तादृशो मनसो वरणीयरूपालाभे अनिरुद्धतैव तिष्ठेदित्यतो तदनु वरणीये रूपे निरुद्धता भृशं फलायते. तद् उक्तं **''भक्तानाम् अनुग्रहार्थमेव भक्तसमानरूपं देहम् आस्थितो, विजातीये तेषां विश्वासो न भवेदिति. ततो यथा मनुष्यानुग्रहाय मानुषो देहः प्रदर्शितः एवं गोपिकानामपि अनुग्रहाय स्वानन्दं गोकुले दातुं तादृशीः क्रीडाः भजते''** (सुबो.१०।३०।३७) इति. एतादृग्वरणीयरूपलाभेतु **''तावद् भयं द्रविण-देह-सुहृन्-निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः तावद् 'मम'इति असदवग्रहो आर्तिमूलं यावद् न ते अंघ्रिम् अभयं प्रवृणीत लोकः''**, **''... 'वृणीत' इति यथा कन्या वरं वृणीते स्वेष्टपूरकत्वेऽपि स्वयमेव तदीया भवति नतु स स्वकीयः. 'लोकः' इति विशिष्टाधिकारी''** (भाग.पुरा.सुबो.३।९।६) इत्यत्र उक्तं भक्तकृतं भगवद्वरणं मुक्तिरूपफलं भगवदीयत्वापरपर्यायरूपं ज्ञेयम्. तादृशे घोषवरे वरणीय-मनोहर-रूपधरे नन्दनन्दने मम रतिः अस्तु इति उत्तरेण अन्वयः.

**धरणीरमणी-रमणैकपरे** इति, धरण्येव रमणी धरणीरमणी यथाच उच्यते **''किं ते कृतं क्षिति तपो बत केशवांघ्रिस्पर्शोत्सवोत्पुलकिता अंगरुहैः विभासि''** (भाग.पुरा.१०।२७।१०) इत्यत्र. अथवा रमांशरूपा रमाविष्टा वा धरण्यां जाताः याः रमण्यो यासां शृंगारिकरसे भगवता रमारूपा हि आत्मरतिः, मूर्तौ देवतेव प्रतिष्ठापिता, ताएव सर्वात्मभावत्यो भवन्ति. तथाच उक्तं **''यत् पत्यपत्यसुहृदाम् अनुवृत्तिः... अस्तु एवम् उपदेशपदे त्वयि ईशे प्रेष्ठो भवान् तनुभृतां किल बन्धुः आत्मा... कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन्''** (भाग.पुरा.१०।२९।३२-३३) इति, सर्वात्मभावतीभिः सह रमणैकपरे तद् उक्तं **''कृत्वा तावन्तम् आत्मानं यावतीः गोपयोषितः रेमे स भगवान् ताभिः आत्मारामोऽपि लीलया''** (भाग.पुरा.१०।३०।२१) इति. अतो ज्ञायते भगवता रमारूपा आत्मरतिः तासां वात्सल्य-सख्य-शृंगारादिरतौ प्रतिष्ठापिता, मूर्तौ देवतावद् इति.

ततः व्रजभक्तैः साकं रमणैकपरे भगवति. **परमार्ति-हरस्मित-विभ्रमके**

इति, स्मितसहितविभ्रमकस्य परमार्तिहरत्वेन परमं यशः. यथा एतद् "**कृत्स्नगोधनम् उपोह्य दिनान्ते गीतवेणुः अनुगेडितकीर्तिः उत्सवं श्रमरुचापि दृशीनाम् उन्नयन् खुररजश्छुरितस्रक् दित्सया एति सुहृदाशिष एष देवकीजठरभूः उडुराजः**" ( भाग.पुरा.१०।३३।२२-२३ ) इत्यत्र वर्णितो विभ्रमो गोपीजनैश्च गीतोऽपि. तद्वतो भगवतो वृन्दावने या गोचारणलीला तत्कृता च या गोष्ठे परमार्तिः तदपहारकस्य स्मितस्य यद् विलक्षणं यशः तद्युक्ते भगवति रतिः अस्तु इति पूर्ववत्.

ननु *निरोधो न तावत् प्रपञ्चप्रविलयात्मको हि अत्र अभिमतः. ततो विद्यमाने खलु प्रपञ्चे, विद्यमाने च प्रपञ्चमध्यपातिषु भगवच्चिदंशेषु, तेषां तत्र संसृतिजनकेषु हि अविद्यायाअपि स्वरूपाज्ञानादिपञ्चपर्वस्वपि विद्यमानेषु सत्सु, तन्नाशिकां वैराग्यसांख्ययोगतपोभक्तिरूपां पञ्चपर्वात्मिकां विद्यां ऋते मोक्षोपमो निरोधः कथंनु सम्भवेत्? यदपि महाप्रभुणा उक्तं "**भक्तिवद् रूपसम्पत्त्या सर्वान् मोचयितुं क्षमः... भक्ताः पूर्वत्र निर्दिष्टाः ते रोद्धव्या विमुक्तये. कृष्णे निरुद्धकरणाद् भक्ताः मुक्ताः भवन्ति हि. भक्तेश्च शुद्धचतासिद्धयै प्रपञ्चाद् विनिवारणम्; आसक्तिः आत्मनि तथा, निरोधार्थं न संशयः**" ( त.दी.नि.३।९।१७२-१७६, १०।१४-१७ ) इति तदपि कथम् उपपद्येत? नच अवतीर्णभगवद्रूपे कर्तुमकर्तुमन्यथाकर्तुं सामर्थ्यस्य सद्भावादेव न काचिद् अनुपपत्तिः इति वाच्यं, तथा सामर्थ्यवत्त्वेऽपि संसृतिजनकाविद्या-तन्नाशकविद्ययोः नाशात्मक-कार्यकारणभाव-भंगप्रसंगस्तु दुष्परिहरएव स्याद्* इति चेद् न, "**विद्याविद्ये हरेः शक्ती माययैव विनिर्मिते ते जीवस्यैव न अन्यस्य दुःखित्वं चापि अनीशता**" ( त.दी.नि.१।३१ ) इति उक्तेः स कार्यकारणभावनिर्बन्धो हि अनीशेषु जीवेष्वेव न पुनः सर्वेशे भगवति. अतएव निबन्धारम्भएव —

"**सएव परमकाष्ठापन्नः कदाचिद् जगदुद्धारार्थम् अखण्डः पूर्णएव प्रादुर्भूतः सन् 'कृष्णः' इति उच्यते. ननु पूर्वं साधनानि सिद्धान्येव सर्वत्र, तत्र अनधिकारेण साधनाभावे**



**भगवानपि अवतीर्य किं करिष्यति? इति आशंकायाम् आह 'अद्भुतकर्मणे' इति. भगवतो अद्भुतकर्मत्वम्... असाधनं साधनं करोति इति**".

( त.दी.नि.प्र.१।१ ).

इति महाप्रभुणैव समाहितत्वेन 'साधननिरोधः' तावद् जीवोद्धारार्थम् अपेक्षितसाधनानां भगवति जीवानुष्ठिततानैरपेक्ष्यमेव. यथा प्रबलप्रवाहे निमज्जतो तरणासमर्थस्य उद्धरणे तत्समर्थस्य जलप्रवाहे तरणसामर्थ्यं, तादृशस्य समर्थस्यापि पुनः इतरतारणसामर्थ्याभावे उद्धारकत्वानुपपत्तिवत् च. अतो विद्यायाः पञ्चानामपि पर्वाणां व्यापारो भगवत्येव संनिरुद्धइति न भगवान् भक्तेषु तदनुष्ठानम् अपेक्षते. तद् उच्यते "**भगवान् निरोधलीलाम् एतदर्थं कृतवान्. यत् सर्वकर्मसु स्वयं प्रविष्टः तानि कर्माणि स्वकर्माणि कृत्वा तेभ्यः तान् मोचयति**" ( सुबो.१०।२५।३ ) इति. तदेव इहापि वर्णयन्ति **मकराकृति-कुण्डल-शोभिमुखे** इति व्रजराजसुतविशेषेण. तद् उपपादितं "**भृत्यानुकम्पितधिया इह गृहीतमूर्तेः... भगवतो वदनारविन्दं यद् विस्फुरन्मकरकुण्डलमण्डितेन**" ( भाग.पुरा.३।२८।२९ ) इत्यस्य सुबोधिन्यां :

"**तदेव वदनारविन्दं ध्येयं यत् सर्वजनीनं; तदैव च सर्वजनीनं भवति यदि भूमौ अवतरति. अवतारश्च तदैव भवेद् यदि भृत्यानां दुःखं भवति. तद् आह 'भृत्यानुकम्पितधिया गृहीता मूर्तिः' येन. अवतीर्णस्य अन्यथाशंकाव्युदासाय आह 'भगवतः' इति. दृष्टिमात्रेणैव तापापनोदनाद् अरविन्दत्वम्. तद् मुखारविन्दं... यद् मुखारविन्दं विशेषेण स्फुरती मकराकृते कुण्डले ताभ्यां मण्डितेन गण्डयुगलेन... नवविशेषणानि मुखे निरूपितानि नवरसजननाय सर्वेषां वशीकरणाय, नवविधा भक्तिश्च निरूप्यते. मुखम् आनन्दरूपस्य भगवतो भक्तिरसात्मकं फलं भवति... कपोलौ च भक्तिरसानुभवे भक्तानां समाजस्थानमेव भवति; तत्र क्रियापराः ज्ञानपराः**

च भक्ता: उल्लसन्ति. सांख्ययोगौ मकरकुण्डले... सांख्ययोगयो: यो अयम् अनुभाव: तद् वल्गितम्. तेन विद्योतितत्वं क्रियाज्ञानशक्त्या आविर्भाव:...''.

(सुबो.३।२८।२९).

एतेन विद्याया: साधनरूपाणां निखिलानामपि पर्वाणां भक्तिफलात्मके भगवन्मुखारविन्दे निरोध: ज्ञानवैराग्यरूप-साधननिरोधात्मना अवगन्तव्य:. तद् उच्यते :

''जातश्रद्धा मत्कथासु निर्विण्ण: सर्वकर्मसु वेद दु:खात्मकान् कामान् परित्यागेऽपि अनीश्वर:. ततो भजेत मां प्रीत: श्रद्धालु: दृढनिश्चयो जुषमाणश्च तान् कामान् दु:खोदर्कान् च गर्हयन्. प्रोक्तेन भक्तियोगेन भजतो मा असकृद् मुने: कामा: हृदय्या: नश्यन्ति सर्वे मयि हृदि स्थिते... तस्माद् मद्भक्तियुक्तस्य योगिनो वै मदात्मनो न ज्ञानं नच वैराग्यं प्राय: श्रेयो भवेद् इह. यत् कर्मभि: यत् तपसा ज्ञानवैराग्यत: च यद्, योगेन दानधर्मेण श्रेयोभि: इतरैरपि, सर्वं मद्भक्तियोगेन मद्भक्तो लभते अञ्जसा''.

(भाग.पुरा.११।२०।२७-३३).

एतेन निखिलविद्यापर्वात्मकस्य भक्तिफलानुभावात्मकस्य भगवन्मुखारविन्दस्य या साधननिरोधभावापन्नता लीलायां प्रसिद्धा तां निरूप्य तादृङ्मुखारविन्दवतो भगवतएव फलनिरोधरूपतामपि वर्णयितुम् आहु: **मुखरीकृत-नूपुर-हृद्यगतौ** इति. अत्र 'हृद्यगतौ' इतिपदेन भक्तेभ्यो बाह्यावस्थित: आलम्बनविभावात्मा भगवान् निजचरणधारितयो: नूपरयो: मुखरीकृतध्वनिभि: या भक्तहृदयाभ्यन्त:प्रवेशनरूपां यां लीलां करोति सैव हि तस्य हृद्या गति: इति प्रतिपाद्यते. यस्माद् **''यावद् बहिस्थितो वह्नि: प्रकटो वा विशेद् नहि तावद् अन्त:स्थितोऽपि एष न दारुदहनक्षम: एवं सर्वगतो विष्णु प्रकट: चेद् न तद् विशेत् तावद् न लीयते सर्वम् इति कृष्णसमुद्यम:** (सुबो.१०।१।१) इत्यत्र उपपादितां भक्ताभ्यन्त:प्रवेशनरूपां लीलां प्रकटीकर्तुं प्रमेय-फल-प्रकरणगतयो: वेणुगीत-युगलगीतयो: संकीर्तिता भगवत: भक्तहृदयाभ्यन्त:प्रवेशावस्थानयो: लीला इहापि प्रतिपित्सिता. यथाच उक्तं फलप्रकरणारम्भे सुबोधिन्याम् **''बाह्याभ्यन्तरभेदेन आन्तरं तु परं फलम्''** (सुबो.१०।२६।०।४) इति 'परम्'=उत्कृष्टम् इति अर्थ:.

अन्ते **गतिसंगत-भूतलताप-हरे हरशक्र-विमोहन-गानपरे** इति विशेषणद्वयेन भगवत: वीर्यवैराग्ये निरूप्येते. तद् उपपादितं महाप्रभुणा **''रमते च रमातोऽपि विशेषेण रतिप्रद:, परोक्षेऽपि रतिं चक्रे तेन वीर्यम् उदीरितम्''** (त.दी.नि.३।१०।पूर्वा.१०१) इति. तथाहि श्रीभागवतेऽपि **''गोप्य: कृष्णं वने याते तम् अनुद्रुतचेतस: कृष्णलीलानुगायन्त्यो निन्यु: दु:खेन वासरान्'', ''एवं व्रजस्त्रियो राजन् कृष्णलीलानुगायती: रेमिरे अह:सु तच्चित्ता: तन्मनस्का महोदया:''** (भाग.पुरा.१०।३२।१, १०।३२।२६) इति. यत्रापि भगवान् गच्छति विहरति वा तत्र सर्वत्र भगवत्येव मनसो निरुद्धत्वेन तल्लीलापरिकराणां मनसां अनुगमनात्मिका तादृशी संगति: जायते. यादृश्या संगत्या भूतलस्थितानां सर्वेषामपि सर्वविधतापापहरणं सिद्ध्यति, **''मानसी सा परा मता... तत: संसारदु:खस्य निवृत्ति:''** (सिद्धा.मुक्ता.१-२) इति उक्ते:. एतेन बाह्यदेशे भगवत: परोक्षतायां भगवद्वियोगजं यद् दु:खं भवतीति दु:खतप्तेन मनसा भगवलल्लीलास्थल्यादौ भगवति निरुद्धमनसां स्वारसिकं मनोनिर्गमनं तादृग्दु:खनिवारकं सद् आभ्यन्तरलीलानुभूत्यात्मना सम्पद्यते. तादृश्या तन्निष्पत्त्या परं फलं चापि वर्णितं ज्ञेयम्. तद् उक्तं **''प्रेष्ठ! त्वद्वदनाम्बुजं हृदि समागच्छेत् कथञ्चिद् मम, प्राणान् स्थापयति स्वभावशिशिरस्निग्धालकालिश्रितान्, नोचेत् त्वद्विरहेण दावदहनज्वालायितेन द्रुतं जीर्णा: पञ्चशिलीमुखान्तररुजा गच्छेयुरेव आतुरा:''** (९ विज्ञ.५।१२) इत्यत्र प्रभुचरणेनापि. ततश्च तादृक्तापहरे भगवति रते: आशंसा इति पूर्ववत्.

तस्माद् युगलगीतोदिते भगवद्रूपलीले इह अनुसन्धेये इत्यतः **''सवनशः तद् उपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः... कश्मलं ययुः अनिश्चिततत्त्वाः''** (भाग.पुरा.१०।३२।१५) इति कारिकोदिता अस्य फलात्मकस्य भगवतो आन्तररसानुभूतेः देवदुर्लभतापि संसूचिता. तद् उक्तं देवर्षिणापि **''नैव अद्भुतं त्वयि... ब्रह्मादिभिः हृदि विचिन्त्यम् अगाधबोधैः''** (भाग.पुरा.१०।-६६।१८) इति अगाधबोधैरपि देवैः अचिन्त्यत्वेन तेषु भगवद्वेणुवादश्रवणेन विमोहो जायते : भगवान् लौकिकगोपरूपेण अवतीर्णइति गोपलोकानुवर्तनायैव वेणुवादनमपि करोति आहोस्विद् अन्येनापि केनचिद् अज्ञातेन प्रयोजनेन! व्रजभक्तेषुतु पञ्चपर्वात्मिकायाः विद्यायाः फलं वेणुवादनेनैवेति तत्कृतसाधननिर-पेक्षो भगवान् सम्पादयति इति. अयम् आशयः : देवाश्च सर्वे **''देवाः नारायणांगजाः... दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः''** (भाग.पुरा.२।-५।१५-३०) इति आत्मरतेः भगवतो स्वांगेषु वैराग्यपूर्विका व्रजलीलापरिकरभू-तानां गो-गोप-गोपिकासु विद्यायाः पञ्चपर्वाणां फलसम्पत्त्यै यद् भगवद्वैराग्यबोधकं वेणुवादनं तत्परे भगवति रतिः अस्तु इति आशंसा.

एतावान् परं विशेषो व्रजलीलायां शुद्धपुष्टिलीलारूपायां वात्सल्य-सख्य-दास्य-माधुर्यादिभाववतां लीलापरिकराणाम् मध्ये व्रजराजात्मजस्य भगवतो अवस्थानं तेषां तादृक्तादृग्भावालम्बनविभावितरूपेण तेभ्यो बाह्ये भवति; तथैव, तेषां हृदयाभ्यन्तरेष्वपि तादृक्तादृक्स्थायिभावात्मनापि भवत्येव. तस्यैव व्रजराजात्मजस्य वदनावतारेण महाप्रभुणा प्रकटिते पुष्टिपुष्ट्यादिलीलारूपेतु निर्गुणभक्तिमार्गे कीर्तन-पादसेवना-ऽर्चन-वन्दन-दास्य-सख्यात्मनिवेदनानां विषयीभूतो यो भगवद्विग्रहो भजनरसावलम्बनविभावात्मना नाम भजनीयमूर्तितया भक्तबाह्यदेशे खलु अवस्थितो भवति. पुनः श्रवण-कीर्तन-स्मरण-भावनादिभिः निष्पन्नस्य माहात्म्यज्ञानपूर्वकसुदृढसर्वतोधिकस्नेहरूपस्य भक्तिरसस्य स्थायिभा-वतयापि भक्तहृदये आभ्यन्तरावस्थितिः तस्य विलसति. तद् उक्तं **''यदि श्रीगोकुलाधीशो धृतः सर्वात्मना हृदि ततः किमपरं ब्रूहि लौकिकैः वैदिकैरपि''** (चतुश्लो.३) इत्यत्र. एवम् भक्तिरसालम्बनविभावरूपस्य भगवद्विग्रहस्य भक्तहृदयाभ्यन्तःप्रवेशनरूपां स्वप्रवणचित्ततासम्पादिकायाः लीलायाः तत्कर्तुः



च भगवत्स्वरूपस्य गुणगानं कृत्वा इतः परं भक्तिरसस्थायिभावात्मना भक्तहृदि अन्तःप्रविष्टस्य तस्य 'आसक्तिभ्रम'न्यायेन बाह्यानुभूतिजनिकां लीलां स्वरूपं गुणान् च वर्णयितुम् आरभन्ते :

**(नन्दगोपव्रजे प्रादुर्भूतस्य भक्तनिरोधकृद्-आभ्यन्तररतिरूपस्य भगवतो गुणगानं द्वाभ्याम्)**

**परम-प्रिय-गोपवधू-हृदये दयया दिनताप-हरे सुहृदाम्**[वीर्यं] **॥**
**हृदयस्थित-गोकुल-वासिजने**[वैराग्यं] **जन-हृद्य-विहार-परे सततम्**[ऐश्वर्यं] **॥३॥**
**तत-वेणु-निनाद-विनोद-परे**[ज्ञानं] **पर-चित्तहर-स्मितमात्र-कथे**[श्रीः] **॥**
**कथनीय-गुणाकर-पादयुगे**[यशः] **युगले-युगले सुदृशां सुरतौ ॥४॥**

**रतिरस्तु मम व्रजराजसुते**

**परम-प्रिय-गोपवधू-हृदये दयया दिनताप-हरे सुहृदाम्**[वीर्यं] इति, 'दयया परमप्रिय-गोपवधू-हृदये सुहृदां दिनतापहरे रतिः अस्तु' इति पूर्ववदेव योजना. अत्र वृन्दावने भगवतो या दिवसकालिकी गोचारणलीला तज्जन्यवियोगतापहारकं च सायंकाले भगवतो गोष्ठागमनात् पूर्वमपि भावात्मकं पुनरागमनदर्शनं तद्विषयिण्या भावनया राजभोगोत्तरसेवोत्तरो यो अनवसरकालिको भगवद्वियोगो तदपहारकश्च उत्थापनकाले पुनः भगवतः संयोगविषयको भावः च तत्साधिका च संन्यासनिर्णय-निरोधलक्षणग्रन्थयोः उपदिष्टा व्रजलीलाभावना चापि तथैव च भक्ताभ्यन्तःस्थितस्य भगवतो बाह्याविर्भावे मनोरथानां भरोऽपि निरूपितः.

तथाहि :

**''यदुपतिः द्विरदराजविहारो यामिनीपतिरिव एष दिनान्ते**
**मुदितवक्त्र उपयाति दुरन्तं मोचयन् व्रजगवां दिनतापम्''.**
**''गुणगाने सुखावाप्तिः गोविन्दस्य प्रजायते यथा तथा**

शुकादीनां नैव आत्मनि कुतो अन्यतः ? क्लिश्यमानान् जनान् दृष्ट्वा कृपायुक्तो यदा भवेत् तदा सर्वं सदानन्दं हृदिस्थं निर्गतं बहिः, सर्वानन्दमयस्यापि कृपानन्दः सुदुर्लभः. हृद्गतः स्वगुणान् श्रुत्वा पूर्णः प्लावयते जनान्. तस्मात् सर्वं परित्यज्य निरुद्धैः सर्वदा गुणाः सदानन्दपरैः गेयाः सच्चिदानन्दता ततः''.

( भाग.पुरा.१०।३२।२५ , निरो.लक्ष.६-९ ).

इति, बाह्यावस्थितस्य रसात्मकस्य भगवतो यद्वद् अन्तःकरणे अनुभूतिः फलरूपा तद्वदेव अन्तःस्थितस्य तस्य बाह्यानुभूतिरपि तथेति न लेशतोऽपि तारतम्यं तत्र मन्तव्यम्.

ननु * आन्तरानुभूतिः परमफलरूपा चेत् का वा अपेक्षा बाह्याविर्भास्य यावता ''**बाह्याभ्यन्तरभेदेन आन्तरन्तु परं फलम्**'' ( सुबो.१०।२६।०।५ ) इति वचने आन्तरानुभूतेरेव परमफलत्वांगीकारात्.

नच ''**यत्र एकाग्रता तत्र अविशेषाद्**'' ( ब्र.सू.४।१।११ ) इत्यस्य भाष्ये ''**बहिः आविर्भावो येभ्यः येभ्यश्च अन्तः तेषां मिथः तारतम्यम् अस्ति न वा ? इति तत्र निर्णयम् आह 'यत्र'=भक्तेषु एकाग्रता भगवत्स्वरूपे प्रकटएव एकस्मिन् ग्राहकचित्तधारा नतु अन्तर्बहिर्विज्ञानं तत्र उभयोः अन्तःपश्यतो बहिःपश्यतः च भावे भगवत्स्वरूपे च विशेषाभावाद् न तारतम्यम् अस्ति**'' ( ब्र.सू.भा.४।१।११ ) इति बाह्याभ्यन्तरयोः तारतम्यस्य अनंगीकारात् का वा हानिः उभयथापि फलानुभूतेरेव सातत्याद् इति वाच्यं,

''**यत् चक्षुषा न पश्यति येन चक्षूंषि पश्यति तदेव ब्रह्म त्वं विद्धि न इदं यद् इदम् उपासते**'', ''**स मानसीनः आत्मा जनानाम् अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा**'' ( केनोप.१।६ , तैत्ति.आर.३।११।१ )



इति श्रुतिभ्यां ब्रह्मणो बाह्यविषयत्वानंगीकारेण आन्तरत्वोपदेशात् च बाह्यानुभूतेस्तु साधनतायाः अन्यथोपपत्तेः शक्यत्वेनापि फलरूपतानुपपत्तिः * इति चेद्

न, ''**प्राज्ञेन आत्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्**'' ( बृह.उप.४।३।२१ ) इति भूमानन्दानुभूतौतु बाह्याभ्यन्तरयोः उभयविधानुभवयोरपि निषेधो दृश्यते, सतु स्वरूपदृष्ट्यैव. लीलायान्तु भगवतो बहिराविर्भावितरूपदृष्ट्या उभयथापि अनुभवस्य शक्यत्वेन भाष्यकारैरपि ''**अत्र रसात्मकस्वरूपलाभे सति आनन्दवत्त्वं... स रसस्तु संयोग-विप्रयोगाभ्यामेव पूर्णो भवति अनुभूतो नैकतरेण**'' ( ब्र.सू.भा.४।२।१३ ) इत्येवं प्रतिपादयद्भिः उभयत्र भगवदनुभूत्यभावे रसानुभूतेः अकृत्स्नतोपपादनात् च. तेच उभे भगवत्संयोगवियोगानुभूती एकतरस्मिन् बाह्यदेशे हृदयाभ्यन्तर्देशे वा भगवत्संयोगस्य या भगवद्वियोगस्य वा अनुभूतिनैरन्तर्ये नैव शक्ये. तस्माद् यथा बाह्यतो वियोगे आन्तरसंयोगः; तथा, बाह्यसंयोगसुखेऽपि रसानुभूतिस्वाभाव्यात् कदाचित् स्वारसिकी वियोगानुभूतिरपि न न शक्या. उपपादितं च एतत् प्रभुचरणैः तथाहि :

''**पूर्वम् अनुभावितो यो भजनानन्दः सतु ब्रह्मानन्दतः शास्त्रीयभजनानन्दतः च कोटिगुणाधिको अनिर्वचनीयः च भवति. तथाच सन्निकर्षेतु अग्रिमाग्रिमनूतनरसाकांक्षा तदनुकूलो यत्नः च भवति नतु पूर्वानुभूतलीलास्वरूपतलस्पर्शः कदापि. विप्रकर्षेतु मनआदीनां बहिःस्वविषयालाभे अन्तर्विद्यमानमेव तं गृह्णन्ति तदा यथा बहिःप्रकटात् प्रियाद् रसानुभवः पूर्वम् आसीत् तथा अन्तप्रकटात् प्रियात् पूर्वस्मादपि विलक्षणो रसो अनुभूतो भवति यः संगमेऽपि दुरापः**''.

( सुबो.टिप्प.१०।४४।३५-३६ ).

इति भगवतोऽपि लीलार्थं रसात्मकवपुःप्राकट्ये रसमर्यादानुसरणं भक्तानां

कृते लीलारस-भक्तिरसप्रकर्षायैव न जातु अपकर्षाय नचापि एतावता तस्य मायिकत्वम् इति भ्रमितव्यम्. तथाच उक्तं "**तं यथा-यथा उपासते तथैव भवति**", "**ये यथा मां प्रपद्यन्ते तान् तथैव भजामि अहम्**", "**त्वं भावयोगपरिभावितहृत्सरोज... यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय**", "**स्वयं तदन्तर्हृदये अवभातम् अपश्यत अपश्यत यद् न पूर्वम्**" (मुद्ग.उप.३।३, भग.गीता.४।११, भाग.पुरा.३।९।११, ३।८।२२) इत्यत्र.

**हृदयस्थित-गोकुल-वासिजने**[वैराग्यं] इति, ननु *"**ब्रह्म वा इदम् अग्रे आसीत् तद् आत्मानमेव अवेद 'अहं ब्रह्म अस्मि' इति तस्मात् तत् सर्वम् अभवत्**", "**तद् आत्मानं स्वयम् अकुरुत तस्मात् तत्सुकृतम् उच्यते**", "**आत्मैव इदं सर्वम् इति स वा एष एवं पश्यन् एवं विजानन् आत्मरतिः आत्मक्रीडः... आत्मानन्दः**" (बृह.उप.१।४।१०, तैत्ति.उप.२।७, - छान्दो.उप.७।२६।२) इत्येवमादिवचनेभ्यो ब्रह्मैव सर्वभावापन्नं भवति. सेचेयं सर्वरूपता तस्य सुकृतिरूपा न पुनः दुष्कृतिरूपा तस्मात् तस्य सर्वनामरूपकर्मसु आत्मत्वदृष्ट्या आत्मानन्दरूपा आत्मरतिरूपा भगवतः आत्मक्रीडतैवेति हेये वस्तुन्येव वैराग्यस्य शक्यत्वेन ब्रह्मणि वैराग्यसम्भावनैव नास्तीति श्रीव्रजराजसुतस्य ब्रह्मत्वे एतद्विशेषेण वैराग्यगुणनिरूपणं न शक्यम्* इति चेद् न, भगवतैव "**समो अहं सर्वभूतेषु न मे द्वेष्यो अस्ति न मे प्रियः ये भजन्ति तु मां भक्त्या मयि ते तेषुचापि अहम्**", "**अहं... साधुभिः ग्रस्तहृदयो भक्तैः भक्तजनप्रियो नाहम् आत्मानम् आशासे मद्भक्तैः साधुभिः विना श्रियं च आत्यन्तिकीं... साधवो हृदयं मह्यं साधूनां हृदयन्तु अहं, मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपि**" (भग.गीता.९।२९, भाग.पुरा.९।४।६३-६८) इति लीलायां अद्वयानन्दात्मरूपे स्वस्मिन् यथा सदसद्-धर्माधर्म-सुखदुःखादिद्वैतप्राकट्यं तथा आत्मानन्दरूपायाम् आत्मरतावपि भक्तानुरागिता अभक्तविरागिता च लीलात्मिकैव प्रकटीकृतेति न दोषः कश्चन. नच एतावता भगवतो व्रजराजात्मजस्य परब्रह्मत्वे काचिद् न्यूनता "**एकः सन् बहुधा... रोहिणी पिंगला एकरूपा... अयं यः श्वेतो रश्मिः परि सर्वम्**



**इदं जगत्... श्वेतो रश्मिः परि सर्वं बभूव**" (तैत्ति.आर.३।११।२-११) इति श्रुतेः. अतएव मथुरावस्थितोऽपि "**गच्छ उद्धव! व्रजं सौम्य पित्रोः नौ प्रीतिम् आवह गोपीनां मद्वियोगाधिं मत्सन्देशैः विमोचय. ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्मि अहम्**" (भाग.पुरा.१०।४३।३-४) इति स्वस्य हृदयस्थित-गोकुलवासि-जनत्वम् आविश्चकार. तथाविधे भगवति अस्माकमपि फलनिरोधरूपा रतिः अस्त्विति तत्र साधननिरोधरूपा स्वस्य तद्हृदये वासविषयिणी आशंसा इह विद्योतिता.

**जन-हृद्य-विहार-परे सततम्**[ऐश्वर्यं] इति, इदम् अत्र आकूतं : अविकृतपरिणामवादप्रक्रियाम् अंगीकुर्वता ब्रह्मवादिना यद्यपि प्रापञ्चिकविषयाणामपि "**ऐतदात्म्यम् इदं सर्वम्**" (छान्दो.उप.६।८।७) इति श्रुत्या ब्रह्मात्मकता सर्वथा अभ्युपेतैव. तथापि सृष्टिलीलायां इन्द्रियान्तःकरणयोः ब्रह्मात्मकैरपि विषयैः सह, यद् बाह्यं वा आन्तरं वा, रमणं तत् त्रिगुणात्मकानां विषयाणामेव आद्यन्तवत्त्वेन, सततं न सम्भवति. ततश्च विषयैः सह इन्द्रियाणां बाह्यरमणस्य स्वरूपं "**यद् मैथुनादि गृहमेधिसुखं तुच्छं कण्डूयनेन करयोरिव दुःखदुःखम्**" (भाग.पुरा.७।९।४५) इति निरूप्यते. तथैव आन्तररमणस्यापि "**ध्यायतो विषयान् पुंसः संगः तेषु उपजायते, संगात् सञ्जायते कामः... क्रोधः... संमोहः... स्मृतिविभ्रमः... बुद्धिनाशो बुद्धिनाशात् प्रणश्यति**" (भग.गीता.२।६२-६३) इत्येवं विनिरूपितः. अतएव श्रीभागवते विषयैः सह इन्द्रियान्तःकरणयोः रमणे "**बह्व्यः सपत्न्यइव गेहपतिं लुनन्ति**" (भाग.पुरा.७।९।४०) इति एतादृग्रमणस्य शोकमोहपर्यवसायित्वम् आहोस्वित् रन्तुः आत्मनएव विनाशो भवतीति असातत्यं किल द्योतितम्. नच "**विषयता मायाजन्या विषयो भगवान्. मायायामेव विषयतारूपं भगवतः स्वरूपं प्रकटितम्**" (सुबो.२।९।३३) इति अंगीकाराद् विषयैः इन्द्रियादीनां रमणेऽपि न भगवता सह अरमणं वक्तुं न युक्तम् इति वाच्यं, महाप्रभुणैव "**इन्द्रियाणाम् अर्थः इन्द्रियार्थो अन्तर्हितश्च असौ इन्द्रियार्थश्च, भगवान् सर्वेन्द्रियातीतोऽपि स्वेच्छया भक्तेन्द्रियाणाम् अर्थरूपो जातः**" (सुबो.२।९।३८) इति समाहितत्वेन इन्द्रियव्यापारैः गृहीते विषये मायिकविषयतापराक्रमो

भगवत्कृपाव्यापारेणतु इन्द्रियैः गृहीते भगवति न तत्पराक्रमइति. भगवतस्तु पुनः “**द्रव्यं कर्म च कालः च स्वभावो जीवएव च वासुदेवात् परो ब्रह्मन् नच अन्यो अर्थो अस्ति तत्त्वतः**” (भाग.पुरा.२।९।१४) इति वचनात् द्रव्यकर्मकालाद्यतीततया न इन्द्रियादिसामर्थ्याद् ग्राह्त्यत्वं किन्तु येषु निजस्वरूपदर्शनप्रदानाय अनुग्रहो “**यमेव एष वृणुते तेन लभ्यः**” (मुण्ड.उप.३।२।३) इति वचनाद् भगवतो दृग्गोचरतया यथेच्छं सातत्यनिर्वाहइति तादृशे भगवति रत्याशंसा इह प्रकटीकृता.

**त त-वे णु-नि ना द-वि नो द-परे** [ज्ञानं] इति, ननु किदृशोऽयं विनोदः? भगवद्धर्मरूपज्ञानात्मकः इति ब्रूमः. तद् भगवतो ज्ञानं क्वचिद् विनोदात्मकं क्वचित्तु सायुज्यैकत्वप्रदानात्मकं सद् भक्तानां कृते अविनोदात्मकमपि भवितुम् अर्हति, “**सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमपि उत दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः**” (भाग.पुरा.३।२९।१३) इति वचनात्. भगवता “**भक्त्यातु अनन्यया शक्यः अहमेवंविधो अर्जुन! ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च**” (भग.गीता.११।५४) इति उक्त्वापि “**मां च यो अव्यभिचारेण भक्तियोगेन सेवते स गुणान् समतीत्य एतान् ब्रह्मभूयाय कल्पते**” (भग.गीता.१४।२६) इति इह ब्रह्मभूयस्त्वं ब्रह्मणा सह ब्रह्मात्मकस्य भक्तानां ब्रह्मात्मिकायां लीलायां ब्रह्मात्मकएव लीलाविहारसातत्यं ज्ञेयम्. अन्यथा भक्तानभीष्टमेव ब्रह्मप्रवेशरूपं सायुज्यम् एकत्वं वा भक्तानां कृते अविनोदात्मकं स्यात्. तद् उक्तं “**दुरवगमात्मतत्त्वनिगमाय तवात्ततनोः चरितमहामृताब्धिपरिवर्तपरिश्रमणाः न परिलषन्ति केचिद् अपवर्गमपि ईश्वर! ते चरणसरोजहंसकुलसंगविसृष्टगृहाः**” (भाग.पुरा.१०।८४।२१) इत्यत्र. वस्तुतस्तु भगवत्स्वरूपलीलागुणानन्दानुभवार्थमेव भगवति ब्रह्मानन्दसायुज्यं वा ब्रह्मानन्दैकत्वं वा भगवतो अवतीर्णरूपस्य स्वरूपं लीलाः गुणाः वा भक्तभावपोषणाय भगवता प्रकटीकृताः तान् अनादृत्य मूलाद्वितीयरूपे द्रष्टृ-दृश्य-दर्शनभेदैः अनुभूत्यनर्हे भक्तहृदयावर्जकत्वाभावम् आलोच्य भक्त्यालम्बनविभावात्मतया भगवानेव भक्तेषु भक्तिस्थायिभावतया चापि अन्तःप्रविष्य सर्वाअपि स्वलीलाः भक्तान्तःकरणेष्विव घनीभूतः सन् बहिरपि प्रकटीकरोतीति. तस्माद् भक्तौ भगवानेव भक्तसायुज्यम् अवाप्नोति. अनया



च प्रक्रियया भक्तस्य देहेन्द्रियाद्यन्तःकरणादिरूपो भूत्वा भक्तैकत्वम् आपद्यतइति! भगवतो भवितुम् अभवितुम् अन्यथाभवितुं समर्थत्वाद् विरुद्धधर्माश्रयत्वात् च एवम्. एतादृश्या हि ब्रह्मात्मिकया वेणुवादनविद्यया भगवान् भक्तानां मनोरथपूरकइति तत्परे रतिः अस्तु इति पूर्ववदेव अन्वयः.

**पर-चित्तहर-स्मितमात्र-कथे** [श्रीः] इति, ननु *केयं स्वस्मितमात्रेण परचित्तापहारिका कथा! किं भगवत्स्मिते सौन्दर्यातिशयमूला आहोस्वित् तत्स्मिते काचनालौकिसामर्थ्यमूला वा? नोभे प्राकृतजनस्मितेऽपि तन्मुग्धचित्तानाम् एवम्भावसम्भवाद् वैलक्षण्यानुपपत्तेः* इति चेद् न, अवतीर्णभगवद्रूपस्य निजलीलापरिकरचित्तेषु प्रविश्य स्वशास्तृत्वप्रकटनरूपा इयं लीला, “**अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा**” (तैत्ति.आर.३।११।१) इति वचनात्. स्वेतरविषयकवासनाविशिष्टचित्तेभ्यो विषयवासनजन्यरतिनिरसनेन आत्मरत्यात्मना प्रकटीकरणरूपा किल इयं कथा! चित्तस्य भगवन्नियम्यत्वे न विषयवासनाप्रयुक्ता रतिः किमुत सैव भगवदात्मरतिरूपतया सम्पद्यते. तादृश्या आत्मरत्या चित्तस्य भगवत्प्रवणत्वे भगवदर्थायाः क्रियाध्यानोपासनाभक्त्यादेः न साधनरूपता अपितु भगवद्रूपतैव. तथाच :

> “प्रमेयबलनिष्ठस्य प्रमाणं जायते हरिः, प्रमाणबलनिष्ठस्य प्रमेयात्मा स जायते. भक्तिनिष्ठस्य श्रद्धादिः भजनीयश्च सैव हि, भगवत्स्वरूपनिष्ठस्य हृदि भक्तिः स जायते. दिदृक्षोः सहि दृश्यात्मा विवक्षोः वाच्यमेव स. अविद्या सो ह्यजिज्ञासोः विद्या जिज्ञासोरप्युत. बिभन्त्सोः विषयासक्तिः मुमुक्षोः विरतिः सदा” इति.

तदेतद् उपोद्बलितं भक्तप्रह्लादेन “**नैव आत्मनः प्रभुः अयं निजलाभपूर्णो मानं जनाद् अविदुषः करुणो वृणीते यद्यद् जनो भगवते विदधीत मानं तच्च आत्मने प्रतिमुखस्य यथा मुखश्रीः**” (भाग.पुरा.७।९।११) इति उक्त्या भगवान् करुणया यं वृणीते तस्य हृदये तदनुकूलभावात्मकं

रूपं धृत्वा बहिरपि तद्भावविभावितं स्वस्वरूपम् आविष्करोति. नचैषा कथा भगवतो अन्यत्र क्वचन किदृगपि परचित्तापहारके वस्तुनि व्यक्तौ वा शक्येति युक्तम् उक्तं 'परचित्तहरस्मितमात्रकथे' इति. तादृशि व्रजराजसुते मम रतिः नाम आत्मरतिः अस्तु इति आशंसा. तदेतद् महाप्रभोः "**तस्मात् श्रीकृष्णमार्गस्थो विमुक्तः सर्वलोकतः आत्मानन्दसमुद्रस्थः कृष्णमेव विचिन्तयेद्**" ( सिद्धा.मुक्ता.१५-१६ ) इति सिद्धान्तानुरोधाद् आशंसितं ज्ञेयम्.

**क थ नी य-गु णा क र-पा द यु गे** यशः इति, ननु * प्राकृतगुणानाश्रयस्य अप्राकृतानन्तगुणाश्रयस्य भगवतः पादयुग्मयोः गुणाअपि भक्तिमार्गीयैस्तु यथा कीर्तनीयाः, तथा उपासनामार्गीयैः ध्यातव्याः, योगाभ्यासपरैरपि साधकैः ध्यानधारणाभ्यां चिन्तनीयाः च. तद् अत्र 'कथनीय'तामात्रप्रतिपादने को हेतुः ? तत्र ब्रूमः भगवत्पादयुग्मयोः गुणानां ध्यानं वा धारणा कीर्तनमपि वा सेवानवसरे तावद् आवश्यकमपि न भगवत्सेवावसरे तेषाम् ध्यानधारणास्मरणादीनां प्रासंगिकता. नच तदा तत्कथनमपि तथैव समारब्धां सेवां त्यक्त्वा मध्ये गुणकथने प्रवृत्तिस्तु निरर्थकेन कालक्षेपेण सेव्यपरिश्रमजनिकैव भवित्री इति वाच्यं, यस्माद् इह गुणानां 'कथनीयता'कथनं तेषां स्मारणाभिप्रायकं वा प्रत्यभिज्ञापनाभिप्रायकं वा इति अवगन्तव्यम्. नच अवगतनिजगुणस्य गुणिनः तद्गुणज्ञापनम् अप्रतिपित्सितं निष्प्रयोजनकं च इति वाच्यं, भजनविधौ "**प्रार्थिते वा ततः किं स्यात् स्वाम्यभिप्रायसंशयात्, सर्वत्र तस्य सर्वं हि सर्वसामर्थ्यमेव च**" ( वि.धै.आ.२ ) इति प्रार्थनायाः निषेधोपलम्भेऽपि भक्तानां भगवद्विषयकनिज-मनोरथानां प्रकटनं न दोषायेति तदपि निषिद्धत्वेन न याच्ञारूपेण किन्तु भगवद्गुणानां भगवते दास्यभावेन प्रत्यभिज्ञापनेनैव. तद् उक्तं "**गुणगाने सुखावाप्तिः गोविन्दस्य प्रजायते... हृद्गतः स्वगुणान् श्रुत्वा पूर्णं प्लावयते जनान्**" ( निरो.लक्ष.६-८ ) इति.

अतो येहि भजनीयस्य प्रभोः चरणयुगलयोः कथनीयाः ध्वजाम्भोजचक्रां-कुशयवादयो भक्तकार्यसिद्ध्यर्थमेव धारिताः तादृग्गुणानाम् आकरीभूतस्य भगवच्चरणयुगस्य आरात्रिकदीपावर्तनेन विद्योतनौपयिकं मन्त्रलिंगरूपम्



विशेषणम् इदम्.

ननु * तथात्वेतु पुरुषोत्तमस्य भगवतः तद् आदावेव भवितुम् अर्हति नतु व्युत्क्रमेण अन्ते, यस्माद् भगवत्स्वरूपध्यानविधौ "**ध्यायेद् देवं समग्रांगम्**" इति आदौ, मध्येतु "**स्थितं व्रजन्तम् आसीनं शयानं वा गुहाशयं प्रेक्षणीयेहितं ध्यायेद् शुद्धभावेन चेतसा**"इति उक्त्वा अन्ते "**संचितयेद् भगवतः चरणारविन्दं... जानुद्वयं... ऊरू... नाभिहृदं... वक्षो... बाहून्... वदनारविन्दम् नेत्रं... स्निग्धस्मितानुगुणितम् अवलोकं... हासं... प्रहसितम्**" ( भाग.पुरा.३।-२८।१८-३३ ) इत्येवम्भूतः क्रमो दर्शितः. तद् अत्र व्युत्क्रमो अप्रामाणिको भाति * इति चेद् न, रसशास्त्रे भोग्यभावापन्नानां नायिकानां मुखाद् आरभ्य चरणं यावद् वर्णनं भवति. भोक्तृभावापन्नानां नायकानान्तु चरणाद् आरभ्य वदनं यावद् वर्णनम् इति रसशास्त्रीया रीतिः. व्रजलीलायान्तु भगवतो भक्तार्थमेव प्रादुर्भावस्य अंगीकृतत्वेन तेषां भगवत्स्वरूपानन्दे भोक्तृभावोपेततया व्युत्क्रमेणापि वर्णनं न दोषाय. अतएव प्रमाणप्रकरणे "**अव्याद् अजो अंघ्रिम्... मुखम् उरुक्रम ईश्वरः कम् बुद्धिम्...**" ( भाग.पुरा.१०।६।२२ ) इति क्रमोपलम्भेऽपि फलप्रकरणगते युगलगीते "**वामबाहुकृतवामकपोलो वल्गितभ्रुः अधरार्पितवेणुम्... मुदितवक्त्र उपयाति दुरन्तं मोचयन् व्रजगवां दिनतापम्**" ( भाग.पुरा.१०।३२।२-२५ ) भगवद्वदना-न्दसुधापानतृष्णया व्युत्क्रमो रसपोषकएव. युगलगीतोदिता हि भावाः अत्र राजभोगारात्रिकायां भावनीयाः इति आवेदितत्वात्.

अत्र प्रसक्तानुप्रसक्तं भगवत्पादयुगयोः गुणाकरत्वविवेचनं महाप्रभुणा "**तस्य तत्कार्यार्थं पदे चिह्नानि भवन्ति. प्रकृतेऽपि तेषाम् उपयोगइति तदभिव्यक्तिः क्रियते. तानि... ध्वजस्य स्थापनं भक्तानां निर्भयवासार्थम्. अम्भोजस्थापनं सुखसेव्यत्वाय. चक्रस्थापनं रक्षायै. मनोनिग्रहार्थम् अंकुशस्थापनम्. कीर्तिसिद्ध्यर्थं यवः. वज्रादयोऽपि 'आदि'शब्देन उच्यन्ते पापपर्वतनिराकरणार्थाः**" ( सुबो.१०।२७।२५ ) इत्यत्र कृतम् इहापि अनुसन्धेयम्. अन्येषामपि चिह्नानां निरूपणं महानुभावश्रीमद्हरिरायकृत-

'भगवच्चरणचिह्नवर्णनम्' ग्रन्थे अवलोकनीयम्.

**युगले - युगले सुदृशां सुरतौ रतिः अस्तु मम व्रजराजसुते** इति, **सुदृशां** भगवन्मुखारविन्दसुधापानाय भृशं तृषितानां, **युगले-युगले** युगलगीते प्रत्येकगोपीद्वयवर्णिते दिनतापहारिणि **व्रजराजसुते** सायंकाले पुनः निजमुखारविन्दसुधाप्रदानानौपयिकायां **सुरतौ तादृशापानातुरताजनके भावे मम** श्रीमत्प्रभुरणस्य तद्व्याजेन च तदनुवर्तिनामपि सकलानां भगवत्सेवापराणां राजभोगारात्रिकाकर्तॄणां **रतिः** व्रजभक्तरतिभावानुकूला भावना **अस्तु** इति परमा आशंसा.

( [घ] कथं च तद् विधेयम् इति ? प्रयोगविधिः )

अस्य गानम् उच्चैः न भवति यथा मंगलारात्रिकार्याया प्रैंखपर्यंकारात्रिकार्यायाः क्रियते. अस्यास्तु उपांशुरेव प्रयोगः. यस्मात् प्रभुरेव प्रत्यभिज्ञापनीयतया अत्र अभिप्रेतो न अन्यः. किञ्च माधुर्यभावस्य रहस्यभावात्मकतयापि. इतरयोस्तु **''ताः आशिषः प्रयुञ्जानाः 'चिरं पाहि!' इति बालके हरिद्राचूर्णतैलाद्भिः सिञ्चन्त्यो अजनम् उज्जगुः''** ( भाग.पुरा.१०।५।१२ ) इति न्यायेन उच्चैरेव गानं मोदप्रमोदावहम्. इति अलमिह पल्लवितेन!

**( उपसंहारः )**

ननु बाह्यस्वरूपे षड्विधगुणतद्धर्मी इति सप्तभिः विशेषणैः वर्णितो भगवान् इहतु आन्तरस्वरूपे षड्विधधर्माणामेव विशेषणैः निरूपणमिति किं केवलगुणपरत्वबोधनाय उत **''बाह्याभावेतु आन्तरस्य व्यर्थतेति धर्मिणो निरूपणं बाह्यतयैव अभिलषितम्? नच एतद्वचनस्य प्रथमस्कन्धीयत्वेन इह अप्रासंगिकत्वं शंकनीयं दशमे फलप्रकरणेपि ''अन्तःस्थितो रसः पुष्टो बहिः चेद् विनिर्गतः तदा पूर्णो नैव भवेद्''** ( सुबो.१०।२८।२ )इति प्रतिपादनोपलम्भाद् आन्तरे काचिद् न्यूनता अभ्युपगन्तव्यैव इति चेद् न, उक्तमेव भाष्यकारेण **''स रसस्तु संयोग-विप्रयोगाभ्यामेव पूर्णो भवति अनुभूतो नैकतरेण''** ( ब्र.सू.भा.४।२।१३ ) इति बाह्याभ्यन्तरयोः एकतरस्य



यस्य कस्यचन अभावे हि अपूर्णतातु ध्रुवैव, नटवरवपुषो भगवतो द्विदलात्मकत्वांगीकारात् च. तस्माद् भक्तिसाधनायामपि लीलानुकरणभावनोपदेशाद् भगवत्सेवा-तदनवसरयोः समं प्राधान्यम् अंगीकरणीयम्. तस्माद् बाह्यस्वरूपस्य धर्मभूतगुणबोधकैः विशेषणैः सह वर्णितो धर्मिणः अनुवृत्तिः इह आन्तरस्वरूपनिरूपणोपसंहारे नियततया योजनीया. यस्मात् **''स्मरणं भजनं चापि न त्याज्यम् इति मे मतिः''** ( चतुश्लो.४ ) इति पुष्टिभक्तिसम्प्रदायप्रवर्तकेन वाक्पतिना पुष्टिभक्तिमार्गीयाः प्रेर्यन्ते. इति अलम्.

व्रजराजसुते न निरुद्धोऽहं
नहि तद्भजनेऽपि सदा निरतः ॥
विरतो न कदापि भवेयमतो
रतिरस्तु मम व्रजराजसुते ।१॥
वितथं लिखितं मतिमान्द्यवशाद्
अखिलं तत् करुण! क्षन्तव्यम्! ॥
ननु कोहि दरो विदरात् स्वमतेस्
तव नाममाहात्म्यवराश्रयणात् ॥२॥
वाक्पतिप्रेरणोद्धूतानिलान्दोलितवृक्षवत् ॥
मत्तः फलं निर्गलितं भक्तैकास्वाद्यमेव हि ॥३॥
जिज्ञासापरिप्रश्नाभ्यां नामसेवादिनिष्ठया ॥
तुष्टेनानिलनिर्बन्धादपि व्याख्या विनिर्मिता ॥४॥
उभयोरर्पितांघ्रौ हि स्वामिनीव्रजराजयोः ॥
राजभोगारात्रिकार्या'वर्तिकादीप्ति'नामिका ॥५॥
श्रीतातचरणैर्लब्धग्रन्थव्यासंगवर्त्मना ॥
रथयात्रोत्सवे पूर्णा मनोरथसुपूरिका ॥६॥

इति गोस्वामिश्रीविट्ठलनाथप्रभुचरणविरचितराजभोगारात्रिकार्यायाः
तदनन्यभावभावुकगोस्वामिश्रीदीक्षितसुतेन
श्यामनोहरेण निर्मिता 'वर्तिकादीप्तिः'
सम्पूर्णा